# sarvavedAntasiddhAntasArasangrahaH

# સર્વવેદાન્તસિદ્ધાન્તસારસઙ્ગ્રહઃ

## Document Information

Text title : sarvavedAntasiddhAntasArasa.ngrahaH

File name : ved.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Shankaracharya

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi, Kalyana Krrit kalyanakrrit at gmail.com

Latest update : October 12, 1998, February 13, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 1, 2019

*sanskritdocuments.org*

sarvavedAntasiddhAntasArasangrahaH

# સર્વવેદાન્તસિદ્ધાન્તસારસઙ્ગ્રહઃ

# સર્વવેદાન્તસિદ્ધાન્તસારસઙ્ગ્રહઃ

## અનુક્રમણિકા Verses and Topics


૧ વન્દનમ્ verses 1-3 Salutations to Brahman
૨ સાધન-ચતુષ્ટય verses 4-15 The four indispensable qualifications
૩ વસ્તુ-વિવેકઃ verses 16-21 Discrimination
૪ નૈસ્પૃહ્યમ્ verses 22-47 Desirelessness
૫ અસક્તબુદ્ધિઃ verses 48-69 Dispassionateness
૬ નિર્લોભત્વમ્ verses 70-94 Non-covetousness
૭ શમઃ verses 95-103 Tranquillity
૮ મનઃપ્રસાદઃ verses 104-150 Serenity
૯ સંન્યાસઃ verses 151-209 sannyAsaH
૧૦ શ્રદ્ધા verses 210-217 shraddhA
૧૧ સમ્યગાધાનમ્ verses 218-225 Concentration
૧૨ મુમુક્ષુત્વમ્ verses 226-296 mumukShutvam
૧૩ અધ્યારોપઃ verses 297-309 Superimposition
૧૪ ઈશ્વરઃ verses 310-317 Ishvara
૧૫ પ્રત્યગાત્મન્ verses 318-329 Pratyagatman
૧૬ ઈશ્વરઃ verses 330-333 Ishvara,the cause of the universe
૧૭ પઞ્ચભૂતસૃષ્ટિઃ verses 334-337 Creation of the Five Elements
૧૮ સૂક્ષ્મદેહઃ verses 338-341 The Subtle Body
૧૯ અન્તઃકરણમ્ verses 342-349 The Internal Organ
૨૦ વિજ્ઞાનમયકોશઃ verses 350-354 VijnAnamayakosha
૨૧ મનોમયકોશઃ verses 355-374 Manomayakosha
૨૨ પ્રાણમયકોશઃ verses 375-408 Pranamayakosha
૨૩ પઞ્ચીકરણમ્ verses 409-416 The quintuplication of the Elements
૨૪ ઇન્દ્રિયદેવતાઃ verses 417-429 The deities presiding over the senses

૨૫ જગદુત્પત્તિઃ verses 430-433 The Creation of the gross Universe
૨૬ ચતુર્વિધં ભૂતજાતમ્ verses 434-456 The four different kinds of beings
૨૭ આત્મન્ verses 457-509 The nature of the Atman described
૨૮ અજ્ઞાનનિવૃત્તિઃ verses 510-519 Knowledge destroys Ignorance, not Action
૨૯ કુમત ખણ્ડનમ્ ૫૨૦-૬૧૧ verses 520-611 Refutation of the false doctrines
૩૦ શાશ્વતલક્ષણમ્ verses 612-617 The eternal nature of the Atman
૩૧ ચિત્સ્વરૂપમ્ verses 618-622 The intelligent nature of the Atman
૩૨ આનન્દસ્વરૂપમ્ verses 623-634 The blissful nature of the Atman
૩૩ દુઃખપ્રદં વસ્તુ સુખં દાતું ન સમર્હતિ ૬૩૫-૬૭૨ verses 635-672 Atman the only way to happiness
૩૪ અદ્વિતીયત્વમ્ verses 673-702 The non-dual nature of the Atman
૩૫ તત્ત્વમ્પદયોરર્થઃ verses 703-708 The meaning of the words 'That' and 'Thou'
૩૬ તત્પદસ્ય સમ્યગર્થઃ verses 709-732 The direct meaning of the word 'That'
૩૭ વાચ્યાર્થાનુપપત્તિઃ verses 733-759 The indirect meaning ascertained
૩૮ અર્થસમન્વયઃ verses 760-794 The unified meaning
૩૯ અધિકારઃ verses 795-818 The fitness of the aspirant
૪૦ સવિકલ્પઃ-નિર્વિકલ્પઃ સમાધિઃ verses 819-826 Samadhi, absolute and relative
૪૧ સમાધિલક્ષણમ્ verses 827-865 The internal nature of samadhi
૪૨ શ્રુત્યવગમ્યં તથ્યમ્ verses 866-898 Deep concentration blended with the sruti
૪૩ સમાધિરકલ્પકઃ verses 899-908 Nirvikalpa samadhi, absolute concentration
૪૪ યોગઃ verses 909-921 Yoga, or union with Brahman
૪૫ યોગવિઘ્નાઃ verses 922-923 The obstacles to yoga
૪૬ સ્વાનુભૂતિઃ verses 924-937 Direct experience gained by right knowledge
૪૭ સપ્તભૂમિકાઃ verses 938-948 The seven states of the mind
૪૮ જ્ઞાનલક્ષણમ્ verses 949-978 The nature of knowledge
૪૯ વિદેહમુક્તિઃ verses 978-1006 Videhamukti, incorporeal liberation

sarvavedAntasiddhAntasArasangrahaH

# સર્વવેદાન્તસિધ્ધાન્તસારસઙ્ગ્રહઃ

## સર્વવેદાન્તસિધ્ધાન્તસારસઙ્ગ્રહઃ ગ્રન્થઃ

### verses 1-3 Salutation to Brahman

॥ ૧ ॥ વન્દનમ્ ॥

અખણ્ડાનન્દસમ્બોધો વન્દનાદ્યસ્ય જાયતે ।
ગોવિન્દં તમહં વન્દે ચિદાનન્દતનું ગુરુમ્ ॥ ૧॥

અખણ્ડં સચ્ચિદાનન્દમવાઙ્મનસગોચરમ્ ।
આત્માનમખિલાધારમાશ્રયેઽભીષ્ટસિદ્ધયે ॥ ૨॥

યદાલમ્બો દરં હન્તિ સતાં પ્રત્યૂહસમ્ભવમ્ ।
તદાલમ્બે દયાલમ્બં લમ્બોદરપદામ્બુજમ્ ॥ ૩॥

(અર્થતો।પ્યદ્વયાનન્દમતીતદ્વૈતલક્ષણમ્ ।
આત્મારામહં વન્દે શ્રીગુરું શિવવિગ્રહમ્ ॥)

### verses 4-15 The four indispensable qualifications

॥ ૨ ॥ સાધન-ચતુષ્ટય ॥

વેદાન્તશાસ્ત્રસિદ્ધાન્તસારસઙ્ગ્રહ ઉચ્યતે ।
પ્રેક્ષાવતાં મુમુક્ષૂણાં સુખબોધોપપત્તયે ॥ ૪॥

અસ્ય શાસ્ત્રાનુસારિત્વાદનુબન્ધચતુષ્ટયમ્ ।
યદેવ મૂલં શાસ્ત્રસ્ય નિર્દિષ્ટં તદિહોચ્યતે ॥ ૫॥

અધિકારી ચ વિષયઃ સમ્બન્ધશ્ચ પ્રયોજનમ્ ।
શાસ્ત્રારમ્ભફલં પ્રાહુરનુબન્ધચતુષ્ટયમ્ ॥ ૬॥

ચતુર્ભિઃ સાધનૈઃ સમ્યક્સમ્પન્નો યુક્તિદક્ષિણઃ ।

મેધાવી પુરુષો વિદ્વાનધિકાર્યત્ર સમ્મતઃ ॥ ૭॥

વિષયઃ શુદ્ધચૈતન્યં જીવબ્રહ્મૈક્યલક્ષણમ્ ।
યત્રૈવ દૃશ્યતે સર્વવેદાન્તાનાં સમન્વયઃ ॥ ૮॥

એતદૈક્યપ્રમેયસ્ય પ્રમાણસ્યાપિ ચ શ્રુતેઃ ।
સમ્બન્ધઃ કથ્યતે સદ્ભિર્બોધ્યબોધકલક્ષણઃ ॥ ૯॥

બ્રહ્માત્મૈકત્વવિજ્ઞાનં સન્તઃ પ્રાહુઃ પ્રયોજનમ્ ।
યેન નિઃશેષસંસારબન્ધાત્સદ્યઃ પ્રમુચ્યતે ॥ ૧૦॥

પ્રયોજનં સમ્પ્રવૃત્તેઃ કારણં ફલલક્ષણમ્ ।
પ્રયોજનમનુદ્દિશ્ય ન મન્દોઽપિ પ્રવર્તતે ॥ ૧૧॥

સાધનચતુષ્ટયસમ્પત્તિર્યસ્યાસ્તિ ધીમતઃ પુંસઃ ।
તસ્યૈવૈતત્ફલસંસિદ્ધિર્નાન્યસ્ય કિઞ્ચિદૂનસ્ય ॥ ૧૨॥

ચત્વારિ સાધનાન્યત્ર વદન્તિ પરમર્ષયઃ ।
મુક્તિર્યેષાં તુ સદ્ભાવે નાભાવે સિધ્યતિ ધ્રુવમ્ ॥ ૧૩॥

આદ્યં નિત્યાનિત્યવસ્તુવિવેકઃ સાધનં મતમ્ ।
ઇહામુત્રાર્થફલભોગવિરાગો દ્વિતીયકમ્ ॥ ૧૪॥

શમાદિષટ્કસમ્પત્તિસ્તૃતીયં સાધનં મતમ્ ।
તુરીયં તુ મુમુક્ષુત્વં સાધનં શાસ્ત્રસમ્મતમ્ ॥ ૧૫॥

## verses 16-21 Discrimination

॥ ૩ ॥ વસ્તુ-વિવેકઃ ॥

બ્રહ્મૈવ નિત્યમન્યત્તુ હ્યનિત્યમિતિ વેદનમ્ ।
સોઽયં નિત્યાનિત્યવસ્તુવિવેક ઇતિ કથ્યતે ॥ ૧૬॥

મૃદાદિકારણં નિત્યં ત્રિષુ કાલેષુ દર્શનાત્ ।
ઘટાદ્યનિત્યં તત્કાર્યં યતસ્તન્નાશ ઈક્ષ્યતે ॥ ૧૭॥

તથૈવૈતજ્જગત્સર્વમનિત્યં બ્રહ્મકાર્યતઃ ।
તત્કારણં પરં બ્રહ્મ ભવેન્નિત્યં મૃદાદિવત્ ॥ ૧૮॥

સર્ગં વક્ત્યસ્ય તસ્માદ્વા એતસ્માદિત્યપિ શ્રુતિઃ ।

સકાશાદ્બ્રહ્મણસ્તસ્માદનિત્યત્વે ન સંશયઃ ॥ ૧૯॥

સર્વસ્યાનિત્યત્વે સાવયવત્વેન સર્વતઃ સિદ્ધે ।
વૈકુણ્ઠાદિષુ નિત્યત્વમતિર્ભ્રમ એવ મૂઢબુદ્ધીનામ્ ॥ ૨૦॥

અનિત્યત્વં ચ નિત્યત્વમેવં યચ્છ્રુતિયુક્તિભિઃ ।
વિવેચનં નિત્યાનિત્યવિવેક ઇતિ કથ્યતે ॥ ૨૧॥

## verses 22-47 Desirelessness

॥ ૪ ॥ નૈસ્પૃહ્યમ્ ॥

ઐહિકામુષ્મિકાર્થેષુ હ્યનિત્યત્વેન નિશ્ચયાત્ ।
નૈઃસ્પૃહ્યં તુચ્છબુદ્ધ્યા યત્તદ્વૈરાગ્યમિતીર્યતે ॥ ૨૨॥

નિત્યાનિત્યપદાર્થવિવેકાત્પુરુષસ્ય જાયતે સદ્યઃ ।
સ્રક્ચન્દનવનિતાદૌ સર્વત્રાનિત્યવસ્તુનિ વિરક્તિઃ ॥ ૨૩॥

કાકસ્યવિષ્ઠાવદસહ્યબુદ્ધિર્ભોગ્યેષુ સા તીવ્રવિરક્તિરિષ્યતે ।
વિરક્તિતીવ્રત્વનિદાનમાહુર્ભોગ્યેષુ દોષેક્ષણમેવ સન્તઃ ॥ ૨૪॥

પ્રદૃશ્યતે વસ્તુનિ યત્ર દોષો ન તત્ર પુંસોઽસ્તિ પુનઃ પ્રવૃત્તિઃ ।
અન્તર્મહારોગવતીં વિજાનન્કો નામ વેશ્યામપિ રૂપિણીં વ્રજેત્ ॥ ૨૫॥

અત્રાપિ ચાન્યત્ર ચ વિદ્યમાનપદાર્થસમ્મર્શનમેવ કાર્યમ્ ।
યથાપ્રકારાર્થગુણાભિમર્શનં સન્દર્શયત્યેવ તદીયદોષમ્ ॥ ૨૬॥

કુક્ષૌ સ્વમાતુર્મલમૂત્રમધ્યે સ્થિતિં તદા વિટ્કૃમિદંશનં ચ ।
તદીયકૌક્ષેયકવહ્નિદાહં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૨૭॥

સ્વકીયવિણ્મૂત્રવિમજ્જનં તચ્ચોત્તાનગત્યા શયનં તદા યત્ ।
બાલગ્રહાદ્યાહતિભાક્ચ શૈશવં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૨૮॥

સ્વીયૈઃ પરૈસ્તાડનમજ્ઞભાવમત્યન્તચાપલ્યમસત્ક્રિયાં ચ ।
કુમારભાવે પ્રતિષિદ્ધવૃત્તિં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૨૯॥

મદોદ્ધતિં માન્યતિરસ્કૃતિં ચ કામાતુરત્વં સમયાતિલઙ્ઘનમ્ ।
તાં તાં યુવત્યોદિતદુષ્ટચેષ્ટાં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૦॥

વિરૂપતાં સર્વજનાદવજ્ઞાં સર્વત્ર દૈન્યં નિજબુદ્ધિહૈન્યમ્ ।

વૃદ્ધત્વસમ્ભાવિતદુર્દશાં તાં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૧॥

પિત્તજ્વરાર્શઃક્ષયગુલ્મશૂલશ્લેષ્માદિરોગોદિતતીવ્રદુઃખમ્ ।
દુર્ગન્ધમસ્વાસ્થ્યમનૂનચિન્તાં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૨॥

યમાવલોકોદિતભીતિકમ્પમર્મવ્યથોચ્છ્વાસગતીશ્ચ વેદનામ્ ।
પ્રાણપ્રયાણે પરિદૃશ્યમાનાં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૩॥

અઙ્ગારનદ્યાં તપને ચ કુમ્ભીપાકેऽપિ વીચ્યામસિપત્રકાનને ।
દૂતૈર્યમસ્ય ક્રિયમાણબાધાં વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૪॥

પુણ્યક્ષયે પુણ્યકૃતો નભઃસ્થૈર્નિપાત્યમાનાઞ્શિથિલીકૃતાઙ્ગાન્ ।
નક્ષત્રરૂપેણ દિવશ્ચ્યુતાંસ્તાન્વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૫॥

વાય્વર્કવહ્નીન્દ્રમુખાન્સુરેન્દ્રાનીશોગ્રભીત્યા ગ્રથિતાન્તરઙ્ગાન્ ।
વિપક્ષલોકૈઃ પરિદૂયમાનાન્વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૬॥

શ્રુત્યા નિરુક્તં સુખતારતમ્યં બ્રહ્માન્તમારભ્ય મહીમહેશમ્ ।
ઔપાધિકં તત્તુ ન વાસ્તવં ચેદાલોચ્ય કો વા વિરતિં ન યાતિ ॥ ૩૭॥

સાલોક્યસામીપ્યસરૂપતાદિભેદસ્તુ સત્કર્મવિશેષસિદ્ધઃ ।
ન કર્મસિદ્ધસ્ય તુ નિત્યતેતિ વિચાર્ય કો વા વિરતિં ન યાતિ ॥ ૩૮॥

યત્રાસ્તિ લોકે ગતિતારતમ્યમુચ્ચાવચત્વાન્વિતમત્ર તત્કૃતમ્ ।
યથેહ તદ્વત્ખલુ દુઃખમસ્તીત્યાલોચ્ય કો વા વિરતિં ન યાતિ ॥ ૩૯॥

કો નામ લોકે પુરુષો વિવેકી વિનશ્વરે તુચ્છસુખે ગૃહાદૌ ।
કુર્યાદ્રતિં નિત્યમવેક્ષમાણો વૃથૈવ મોહાન્મ્રિયમાણજન્તૂન્ ॥ ૪૦॥

સુખં કિમસ્ત્યત્ર વિચાર્યમાણે ગૃહેऽપિ વા યોષિતિ વા પદાર્થે ।
માયાતમોऽન્ધીકૃતચક્ષુષો યે ત એવ મુહ્યન્તિ વિવેકશૂન્યાઃ ॥ ૪૧॥

અવિચારિતરમણીયં સર્વમુદુમ્બરફલોપમં ભોગ્યમ્ ।
અજ્ઞાનામુપભોગ્યં ન તુ તજ્જ્ઞાનાં યોષિતિ વા પદાર્થે ॥ ૪૨॥

ગતેऽપિ તોયે સુષિરં કુલીરો હાતું હ્યશક્તો મ્રિયતે વિમોહાત્ ।
યથા તથા ગેહસુખાનુષક્તો વિનાશમાયાતિ નરો ભ્રમેણ ॥ ૪૩॥

કોશક્રિમિસ્તન્તુભિરાત્મદેહમાવેષ્ટ્ય ચાવેષ્ટ્ય ચ ગુપ્તિમિચ્છન્ ।
સ્વયં વિનિર્ગન્તુમશક્ત એવ સંસ્તતસ્તદન્તે મ્રિયતે ચ લગ્નઃ ॥ ૪૪॥

યથા તથા પુત્રકલત્રમિત્રસ્નેહાનુબન્ધૈર્ગ્રથિતો ગૃહસ્થઃ ।
કદાપિ વા તાન્પરિમુચ્ય ગેહાદ્ગન્તું ન શક્તો મ્રિયતે મુધૈવ ॥ ૪૫॥

કારાગૃહસ્યાસ્ય ચ કો વિશેષઃ પ્રદૃશ્યતે સાધુ વિચાર્યમાણે ।
મુક્તેઃ પ્રતીપત્વમિહાપિ પુંસઃ કાન્તાસુખાભ્યુત્થિતમોહપાશૈઃ ॥ ૪૬॥

ગૃહસ્પૃહા પાદનિબદ્ધશૃઙ્ખલા કાન્તાસુતાશા પટુકણ્ઠપાશઃ ।
શીર્ષે પતદ્ભૂર્યશનિર્હિ સાક્ષાત્પ્રાણાન્તહેતુઃ પ્રબલા ધનાશા ॥ ૪૭॥

## verses 48-69 Dispassionateness

॥ ૫ ॥ અસક્તબુદ્ધિઃ ॥

આશાપાશશતેન પાશિતપદો નોત્થાતુમેવ ક્ષમઃ
 કામક્રોધમદાદિભિઃ પ્રતિભટૈઃ સંરક્ષ્યમાણોઽનિશમ્ ।
સમ્મોહાવરણેન ગોપનવતઃ સંસારકારાગૃહા-
 ન્નિર્ગન્તું ત્રિવિધેષણાપરવશઃ કઃ શક્નુયાદ્રાગિષુ ॥ ૪૮॥

કામાન્ધકારેણ નિરુદ્ધદૃષ્ટિર્મુહ્યત્યસત્યપ્યબલાસ્વરૂપે ।
ન હ્યન્ધદૃષ્ટેરસતઃ સતો વા સુખત્વદુઃખત્વવિચારણાસ્તિ ॥ ૪૯॥

શ્લેષ્મોદ્ગારિ મુખં સ્રવન્મલવતી નાસાશ્રુમલ્લોચનં
 સ્વેદસ્રાવિ મલાભિપૂર્ણમભિતો દુર્ગન્ધદુષ્ટં વપુઃ ।
અન્યદ્વક્તુમશક્યમેવ મનસા મન્તું ક્વચિન્નાર્હતિ
 સ્ત્રીરૂપં કથમીદૃશં સુમનસાં પાત્રીભવેન્નેત્રયોઃ ॥ ૫૦॥

દૂરાદવેક્ષ્યાગ્નિશિખાં પતઙ્ગો રમ્યત્વબુદ્ધ્યા વિનિપત્ય નશ્યતિ ।
યથા તથા નષ્ટદૃગેષ સૂક્ષ્મં કથં નિરીક્ષેત વિમુક્તિમાર્ગમ્ ॥ ૫૧॥

કામેન કાન્તાં પરિગૃહ્ય તદ્વજ્જનોઽપ્યયં નશ્યતિ નષ્ટદૃષ્ટિઃ ।
માંસાસ્થિમજ્જામલમૂત્રપાત્રં સ્ત્રિયં સ્વયં રમ્યતયૈવ પશ્યતિ ॥ ૫૨॥

કામ એવ યમઃ સાક્ષાત્કાન્તા વૈતરણી નદી ।
વિવેકિનાં મુમુક્ષૂણાં નિલયસ્તુ યમાલયઃ ॥ ૫૩॥

યમાલયે વાપિ ગૃહેઽપિ નો નૃણાં તાપત્રયક્લેશનિવૃત્તિરસ્તિ ।
કિઞ્ચિત્સમાલોક્ય તુ તદ્વિરામં સુખાત્મના પશ્યતિ મૂઢલોકઃ ॥ ૫૪॥

યમસ્ય કામસ્ય ચ તારતમ્યં વિચાર્યમાણે મહદસ્તિ લોકે ।

હિતં કરોત્યસ્ય યમોઽપ્રિયઃ સન્કામસ્ત્વનર્થં કુરુતે પ્રિયઃ સન્ ॥ ૫૫॥

યમોઽસતામેવ કરોત્યનર્થં સતાં તુ સૌખ્યં કુરુતે હિતઃ સન્ ।
કામઃ સતામેવ ગતિં નિરુન્ધન્કરોત્યનર્થં હ્યસતાં તુ કા કથા ॥ ૫૬॥

વિશ્વસ્ય વૃદ્ધિં સ્વયમેવ કાઙ્ક્ષન્પ્રવર્તકં કામિજનં સસર્જ ।
તેનૈવ લોકઃ પરિમુહ્યમાનઃ પ્રવર્ધતે ચન્દ્રમસેવ ચાબ્ધિઃ ॥ ૫૭॥

કામો નામ મહાઞ્જગદ્ભ્રમયિતા સ્થિત્વાન્તરઙ્ગે સ્વયં
  સ્ત્રીપુંસાવિતરેતરાઙ્ગકગુણૈર્હાસૈશ્ચ ભાવૈઃ સ્ફુટમ્ ।
અન્યોન્યં પરિમોહ્ય નૈજતમસા પ્રેમાનુબન્ધેન તૌ
  બદ્ધ્વા ભ્રામયતિ પ્રપઞ્ચરચનાં સંવર્ધયન્બ્રહ્મહા ॥ ૫૮॥

અતોઽન્તરઙ્ગસ્થિતકામવેગાદ્ભોગ્યે પ્રવૃત્તિઃ સ્વત એવ સિદ્ધા ।
સર્વસ્ય જન્તોર્ધ્રુવમન્યથા ચેદબોધિતાર્થેષુ કથં પ્રવૃત્તિઃ ॥ ૫૯॥

તેનૈવ સર્વજન્તૂનાં કામના બલવત્તરા ।
જીર્યત્યપિ ચ દેહેઽસ્મિન્કામના નૈવ જીર્યતે ॥ ૬૦॥

અવેક્ષ્ય વિષયે દોષં બુદ્ધિયુક્તો વિચક્ષણઃ ।
કામપાશેન યો મુક્તઃ સ મુક્તઃ પથિ ગોચરઃ ॥ ૬૧॥

કામસ્ય વિજયોપાયં સૂક્ષ્મં વક્ષ્યામ્યહં સતામ્ ।
સઙ્કલ્પસ્ય પરિત્યાગ ઉપાયઃ સુલભો મતઃ ॥ ૬૨॥

શ્રુતે દૃષ્ટેઽપિ વા ભોગ્યે યસ્મિન્કસ્મિંશ્ચ વસ્તુનિ ।
સમીચીનત્વધીત્યાગાત્કામો નોદેતિ કર્હિચિત્ ॥ ૬૩॥

કામસ્ય બીજં સઙ્કલ્પઃ સઙ્કલ્પાદેવ જાયતે ।
બીજે નષ્ટેઽઙ્કુર ઇવ તસ્મિન્નષ્ટે વિનશ્યતિ ॥ ૬૪॥

ન કોઽપિ સમ્યક્ત્વધિયા વિનૈવ ભોગ્યં નરઃ કામયિતું સમર્થઃ ।
યતસ્તતઃ કામજયેચ્છુરેતાં સમ્યક્ત્વબુદ્ધિં વિષયે નિહન્યાત્ ॥ ૬૫॥

ભોગ્યે નરઃ કામજયેચ્છુરેતાં સુખત્વબુદ્ધિં વિષયે નિહન્યાત્ ।
યાવત્સુખત્વભ્રમધીઃ પદાર્થે તાવન્ન જેતું પ્રભવેદ્ધિ કામમ્ ॥ ૬૬॥

સઙ્કલ્પાનુદયે હેતુર્યથાભૂતાર્થદર્શનમ્ ।
અનર્થચિન્તનં ચાભ્યાં નાવકાશોઽસ્ય વિદ્યતે ॥ ૬૭॥

રત્ને યદિ શિલાબુદ્ધિર્જાયતે વા ભયં તતઃ ।

સમીચીનત્વધીર્નૈતિ નોપાદેયત્વધીરપિ ॥ ૬૮॥

યતાર્થદર્શનં વસ્તુન્યનર્થસ્યાપિ ચિન્તનમ્ ।
સઙ્કલ્પસ્યાપિ કામસ્ય તદ્વધોપાય ઇષ્યતે ॥ ૬૯॥

## verses 70-94 Non-covetousness

॥ ૬ ॥ નિર્લોભત્વમ્ ॥

ધનં ભયનિબન્ધનં સતતદુઃખસંવર્ધનં
    પ્રચણ્ડતરકર્દનં સ્ફુટિતબન્ધુસંવર્ધનમ્ ।
વિશિષ્ટગુણબાધનં કૃપણધીસમારાધનં
    ન મુક્તિગતિસાધનં ભવતિ નાપિ હૃચ્છોધનમ્ ॥ ૭૦॥

રાજ્ઞોભયં ચોરમયં પ્રમાદાદ્ભયં તથા જ્ઞાતિભયં ચ વસ્તુતઃ ।
ધનં ભયગ્રસ્તમનર્થમૂલં યતઃ સતાં નૈવ સુખાય કલ્પતે ॥ ૭૧॥

આર્જને રક્ષણે દાને વ્યયે વાપિ ચ વસ્તુતઃ ।
દુઃખમેવ સદા નૃણાં ન ધનં સુખ સાધનમ્ ॥ ૭૨॥

સતામપિ પદાર્થસ્ય લાભાલ્લોભઃ પ્રવર્ધતે ।
વિવેકો લુપ્યતે લોભાત્તસ્મિંલ્લુપ્તે વિનશ્યતિ ॥ ૭૩॥

દહત્યલાભે નિઃસ્વત્વં લાભે લોભો દહત્યમુમ્ ।
તસ્માત્સન્તાપકં વિત્તં કસ્ય સૌખ્યં પ્રયચ્છતિ ॥ ૭૪॥

ભોગેન મત્તતા જન્તોર્દાનેન પુનરુદ્ભવઃ ।
વૃથૈવોભયથા વિત્તં નાસ્ત્યેવ ગતિરન્યથા ॥ ૭૫॥

ધનેન મદવૃદ્ધિઃ સ્યાન્મદેન સ્મૃતિનાશનમ્ ।
સ્મૃતિનાશાદ્બુદ્ધિનાશો બુદ્ધિનાશાત્પ્રણશ્યતિ ॥ ૭૬॥

સુખયતિ ધનમેવેત્યન્તરાશાપિશાચ્યા
    દૃઢતરમુપગૂઢો મૂઢલોકો જડાત્મા ।
નિવસતિ તદુપાન્તે સન્તતં પ્રેક્ષમાણો
    વ્રજતિ તદપિ પશ્ચાત્પ્રાણમેતસ્ય હૃત્વા ॥ ૭૭॥

સમ્પન્નોઽન્ધવદેવ કિઞ્ચિદપરં નો વીક્ષતે ચક્ષુષા
    સદ્ભિર્વર્જિતમાર્ગ એવ ચરતિ પ્રોત્સાહિતો બાલિશૈઃ ।

તસ્મિન્નેવ મુહુઃ સ્ખલન્પ્રતિપદં ગત્વાન્ધકૂપે પત-
ત્યસ્યાન્ધત્વનિવર્તકૌષધમિદં દારિદ્ર્યમેવાઞ્જનમ્ ॥ ૭૮॥

લોભઃ ક્રોધશ્ચ દમ્ભશ્ચ મદો મત્સર એવ ચ ।
વર્ધતે વિત્તસમ્પ્રાપ્ત્યા કથં તચ્ચિત્તશોધનમ્ ॥ ૭૯॥

અલાભાદ્દ્વિગુણં દુઃખં વિત્તસ્ય વ્યયસમ્ભવે ।
તતોઽપિ ત્રિગુણં દુઃખં દુર્વ્યયે વિદુષામપિ ॥ ૮૦॥

નિત્યાહિતેન વિત્તેન ભયચિન્તાનપાયિના ।
ચિત્તસ્વાસ્થ્યં કુતો જન્તોર્ગૃહસ્થેનાહિના યથા ॥ ૮૧॥

કાન્તારે વિજને વને જનપદે સેતૌ નિરીતૌ ચ વા
ચોરૈર્વાપિ તથેતરૈર્નરવરૈર્યુક્તો વિયુક્તોઽપિ વા ।
નિઃસ્વઃ સ્વસ્થતયા સુખેન વસતિ હ્યાદ્રીયમાણો જનૈઃ
ક્લિશ્નાત્યેવ ધની સદાકુલમતિર્ભીતશ્ચ પુત્રાદપિ ॥ ૮૨॥

તસ્માદનર્થસ્ય નિદાનમર્થઃ પુમર્થસિદ્ધિર્ન ભવત્યનેન ।
તતો વનાન્તે નિવસન્તિ સન્તઃ સંન્યસ્ય સર્વં પ્રતિકૂલમર્થમ્ ॥ ૮૩॥

શ્રદ્ધાભક્તિમતીં સતીં ગુણવતીં પુત્રાઞ્શ્રુતાન્સમ્મતા-
નક્ષય્યં વસુધાનુભોગવિભવૈઃ શ્રીસુન્દરં મન્દિરમ્ ।
સર્વં નશ્વરમિત્યવેત્ય કવયઃ શ્રુત્યુક્તિભિર્યુક્તિભિઃ
સંન્યસ્યન્ત્યપરે તુ તત્સુખમિતિ ભ્રામ્યન્તિ દુઃખાર્ણવે ॥ ૮૪॥

સુખમિતિ મલરાશૌ યે રમન્તેઽત્ર ગેહે
ક્રિમય ઇવ કલત્રક્ષેત્રપુત્રાનુષક્ત્યા ।
સુરપદ ઇવ તેષાં નૈવ મોક્ષપ્રસઙ્ગ-
સ્ત્વપિ તુ નિરયગર્ભાવાસદુઃખપ્રવાહઃ ॥ ૮૫॥

યેષામાશા નિરાશા સ્યાદ્દારાપત્યધનાદિષુ ।
તેષાં સિધ્યતિ નાન્યેષાં મોક્ષાશાભિમુખી ગતિઃ ॥ ૮૬॥

સત્કર્મક્ષતપાપ્મનાં શ્રુતિમતાં સિદ્ધાત્મનાં ધીમતામ્ var  શુદ્ધાત્માં
નિત્યાનિત્યપદાર્થશોધનમિદં યુક્ત્યા મુહુઃ કુર્વતામ્ ।
તસ્માદુત્થમહાવિરક્ત્યસિમતાં મોક્ષૈકકાઙ્ક્ષાવતાં
ધન્યાનાં સુલભં સ્ત્રિયાદિવિષયેષ્વાશાલતાચ્છેદનમ્ ॥ ૮૭॥

સંસારમૃત્યોર્બલિનઃ પ્રવેષ્ટું દ્વારાણિ તુ ત્રીણિ મહાન્તિ લોકે ।

કાન્તા ચ જિહ્વા કનકં ચ તાનિ રુણદ્ધિ યસ્તસ્ય ભયં ન મૃત્યોઃ ॥ ૮૮॥

મુક્તિશ્રીનગરસ્ય દુર્જયતરં દ્વારં યદસ્ત્યાદિમં
તસ્ય દ્વે અરરે ધનં ચ યુવતી તાભ્યાં પિનદ્ધં દૃઢમ્ ॥

કામાખ્યાર્ગલદારુણા બલવતા દ્વારં તદેતત્ત્રયં
ધીરો યસ્તુ ભિનત્તિ સોઽર્હતિ સુખં ભોક્તું વિમુક્તિશ્રિયઃ ॥ ૮૯॥

આરૂઢસ્ય વિવેકાશ્વં તીવ્રવૈરાગ્યખડ્ગિનઃ ।
તિતિક્ષાવર્મયુક્તસ્ય પ્રતિયોગી ન દૃશ્યતે ॥ ૯૦॥

વિવેકજાં તીવ્રવિરક્તિમેવ
મુક્તેર્નિદાનં નિગદન્તિ સન્તઃ ।
તસ્માદ્વિવેકી વિરતિં મુમુક્ષુઃ
સમ્પાદયેત્તાં પ્રથમં પ્રયત્નાત્ ॥ ૯૧॥

પુમાનજાતનિર્વેદો દેહબન્ધં જિહાસિતુમ્ ।
ન હિ શક્નોતિ નિર્વેદો બન્ધભેદો મહાનસૌ ॥ ૯૨॥

વૈરાગ્યરહિતા એવ યમાલય ઇવાલયે ।
ક્લિશ્નન્તિ ત્રિવિધૈસ્તાપૈર્મોહિતા અપિ પણ્ડિતાઃ ॥ ૯૩॥

શમો દમસ્તિતિક્ષોપરતિઃ શ્રદ્ધા તતઃ પરમ્ ।
સમાધાનમિતિ પ્રોક્તં ષડેવૈતે શમાદયઃ ॥ ૯૪॥

## verses 95-103 Tranquillity

॥ ૭ ॥ શમઃ ॥

એકવૃત્ત્યૈવ મનસઃ સ્વલક્ષ્યે નિયતસ્થિતિઃ ।
શમ ઇત્યુચ્યતે સદ્ભિઃ શમલક્ષણવેદિભિઃ ॥ ૯૫॥

ઉત્તમો મધ્યમશ્ચૈવ જઘન્ય ઇતિ ચ ત્રિધા ।
નિરૂપિતો વિપશ્ચિદ્ભિઃ તત્તલ્લક્ષણવેદિભિઃ ॥ ૯૬॥

સ્વવિકારં પરિત્યજ્ય વસ્તુમાત્રતયા સ્થિતિઃ ।
મનસઃ સોત્તમા શાન્તિર્બ્રહ્મનિર્વાણલક્ષણા ॥ ૯૭॥

પ્રત્યક્પ્રત્યયસન્તાનપ્રવાહકરણં ધિયઃ ।
યદેષા મધ્યમા શાન્તિઃ શુદ્ધસત્ત્વૈકલક્ષણા ॥ ૯૮॥

વિષયવ્યાપૃતિં ત્યક્ત્વા શ્રવણૈકમનસ્સ્થિતિઃ ।
મનસશ્ચેતરા શાન્તિર્મિશ્રસત્ત્વૈકલક્ષણા ॥ ૯૯ ॥

પ્રાચ્યોદીચ્યાઙ્ગસદ્ભાવે શમઃ સિધ્યતિ નાન્યથા ।
તીવ્રા વિરક્તિઃ પ્રાચ્યાઙ્ગમુદીચ્યાઙ્ગં દમાદયઃ ॥ ૧૦૦ ॥

કામઃ ક્રોધશ્ચ લોભશ્ચ મદો મોહશ્ચ મત્સરઃ ।
ન જિતાઃ ષડિમે યેન તસ્ય શાન્તિર્ન સિધ્યતિ ॥ ૧૦૧ ॥

શબ્દાદિવિષયેભ્યો યો વિષવન્ન નિવર્તતે ।
તીવ્રમોક્ષેચ્છયા ભિક્ષોસ્તસ્ય શાન્તિર્ન સિધ્યતિ ॥ ૧૦૨ ॥

યેન નારાધિતો દેવો યસ્ય નો ગુર્વનુગ્રહઃ ।
ન વશ્યં હૃદયં યસ્ય તસ્ય શાન્તિર્ન સિધ્યતિ ॥ ૧૦૩ ॥

## verses 104-150 Serenity

॥ ૮ ॥ મનઃપ્રસાદઃ ॥

મનઃપ્રસાદસિદ્ધ્યર્થં સાધનં શ્રૂયતાં બુધૈઃ ।
મનઃપ્રસાદો યત્સત્ત્વે યદભાવે ન સિધ્યતિ ॥ ૧૦૪ ॥

બ્રહ્મચર્યમહિંસા ચ દયા ભૂતેષ્વવક્રતા ।
વિષયેષ્વતિવૈતૃષ્ણ્યં શૌચં દમ્ભવિવર્જનમ્ ॥ ૧૦૫ ॥

સત્યં નિર્મમતા સ્થૈર્યમભિમાનવિવર્જનમ્ ।
ઈશ્વરધ્યાનપરતા બ્રહ્મવિદ્ભિઃ સહસ્થિતિઃ ॥ ૧૦૬ ॥

જ્ઞાનશાસ્ત્રૈકપરતા સમતા સુખદુઃખયોઃ ।
માનાનાસક્તિરેકાન્તશીલતા ચ મુમુક્ષુતા ॥ ૧૦૭ ॥

યસ્યૈતદ્વિદ્યતે સર્વં તસ્ય ચિત્તં પ્રસીદતિ ।
ન ત્વેતદ્ધર્મશૂન્યસ્ય પ્રકારાન્તરકોટિભિઃ ॥ ૧૦૮ ॥

સ્મરણં દર્શનં સ્ત્રીણાં ગુણકર્માનુકીર્તનમ્ ।
સમીચીનત્વધીસ્તાસુ પ્રીતિઃ સમ્ભાષણં મિથઃ ॥ ૧૦૯ ॥

સહવાસશ્ચ સંસર્ગોઽષ્ટધા મૈથુનં વિદુઃ ।
એતદ્વિલક્ષણં બ્રહ્મચર્યં ચિત્તપ્રસાદકમ્ ॥ ૧૧૦ ॥

અહિંસા વાઙ્મનઃકાયૈઃ પ્રાણિમાત્રાપ્રપીડનમ્ ।
સ્વાત્મવત્સર્વભૂતેષુ કાયેન મનસા ગિરા ॥ ૧૧૧॥

અનુકમ્પા દયા સૈવ પ્રોક્તા વેદાન્તવેદિભિઃ ।
કરણત્રિતયેષ્વેકરૂપતાઽવક્રતા મતા ॥ ૧૧૨॥

બ્રહ્માદિસ્થાવરાન્તેષુ વૈરાગ્યં વિષયેષ્વનુ ।
યથૈવ કાકવિષ્ઠાયાં વૈરાગ્યં તદ્ધિ નિર્મલમ્ ॥ ૧૧૩॥

બાહ્યમાભ્યન્તરં ચેતિ દ્વિવિધં શૌચમુચ્યતે ।
મૃજ્જલાભ્યાં કૃતં શૌચં બાહ્યં શારીરકં સ્મૃતમ્ ॥ ૧૧૪॥

અજ્ઞાનદૂરીકરણં માનસં શૌચમાન્તરમ્ ।
અન્તઃશૌચે સ્થિતે સમ્યગ્બાહ્યં નાવશ્યકં નૃણામ્ ॥ ૧૧૫॥

ધ્યાનપૂજાદિકં લોકે દ્રષ્ટર્યેવ કરોતિ યઃ ।
પારમાર્થિકધીહીનઃ સ દમ્ભાચાર ઉચ્યતે ॥ ૧૧૬॥

પુંસસ્તથાનાચરણમદમ્ભિત્વં વિદુર્બુધાઃ ।
યત્સ્વેન દૃષ્ટં સમ્યક્ચ શ્રુતં તસ્યૈવ ભાષણમ્ ॥ ૧૧૭॥

સત્યમિત્યુચ્યતે બ્રહ્મ સત્યમિત્યપિભાષણમ્ ।
દેહાદિષુ સ્વકીયત્વદૃઢબુદ્ધિવિસર્જનમ્ ॥ ૧૧૮॥

નિર્મમત્વં સ્મૃતં યેન કૈવલ્યં લભતે બુધઃ ।
ગુરુવેદાન્તવચનૈર્નિશ્ચિતાર્થે દૃઢસ્થિતિઃ ॥ ૧૧૯॥

તદેકવૃત્ત્યા તત્સ્થૈર્યં નૈશ્ચલ્યં ન તુ વર્ષ્મણઃ ।
વિદ્યૈશ્વર્યતપોરૂપકુલવર્ણાશ્રમાદિભિઃ ॥ ૧૨૦॥

સઞ્જાતાહઙ્કૃતિત્યાગસ્ત્વભિમાનવિસર્જનમ્ ।
ત્રિભિશ્ચ કરણૈઃ સમ્યઘિત્વા વૈષયિકીં ક્રિયામ્ ॥ ૧૨૧॥

સ્વાત્મૈકચિન્તનં યત્તદીશ્વરધ્યાનમીરિતમ્ ।
છાયેવ સર્વદા વાસો બ્રહ્મવિદ્ભિઃ સહસ્થિતિઃ ॥ ૧૨૨॥

યદ્યદુક્તં જ્ઞાનશાસ્ત્રે શ્રવણાદિકમેષુ યઃ ।
નિરતઃ કર્મધીહીનો જ્ઞાનનિષ્ઠઃ સ એવ હિ ॥ ૧૨૩॥

ધનકાન્તાજ્વરાદીનાં પ્રાપ્તકાલે સુખાદિભિઃ ।

વિકારહીનતૈવ સ્યાત્સુખદુઃખસમાનતા ॥ ૧૨૪॥

શ્રેષ્ઠં પૂજ્યં વિદિત્વા માં માનયન્તુ જના ભુવિ ।
ઇત્યાસક્ત્યા વિહીનત્વં માનાનાસક્તિરુચ્યતે ॥ ૧૨૫॥

સચ્ચિન્તનસ્ય સમ્બાધો વિઘ્નોઽયં નિર્જને તતઃ ।
સ્થેયમિત્યેક એવાસ્તિ ચેત્સૈવૈકાન્તશીલતા ॥ ૧૨૬॥

સંસારબન્ધનિર્મુક્તિઃ કદા ઝટિતિ મે ભવેત્ ।
ઇતિ યા સુદૃઢા બુદ્ધિરીરિતા સા મુમુક્ષુતા ॥ ૧૨૭॥

બ્રહ્મચર્યાદિભિર્ધર્મૈર્બુદ્ધેર્દોષનિવૃત્તયે ।
દણ્ડનં દમ ઇત્યાહુર્દમશબ્દાર્થકોવિદાઃ ॥ ૧૨૮॥

તત્તદ્વૃત્તિનિરોધેન બાહ્યેન્દ્રિયવિનિગ્રહઃ ।
યોગિનો દમ ઇત્યાહુર્મનસઃ શાન્તિસાધનમ્ ॥ ૧૨૯॥

ઇન્દ્રિયેષ્વિન્દ્રિયાર્થેષુ પ્રવૃત્તેષુ યદૃચ્છયા ।
અનુધાવતિ તાન્યેવ મનો વાયુમિવાનલઃ ॥ ૧૩૦॥

ઇન્દ્રિયેષુ નિરુદ્ધેષુ ત્યક્ત્વા વેગં મનઃ સ્વયમ્ ।
સત્ત્વભાવમુપાદત્તે પ્રસાદસ્તેન જાયતે ॥

પ્રસન્ને સતિ ચિત્તેઽસ્ય મુક્તિઃ સિધ્યતિ નાન્યથા ॥ ૧૩૧॥

મનઃપ્રસાદસ્ય નિદાનમેવ
 નિરોધનં યત્સકલેન્દ્રિયાણામ્ ।
બાહ્યેન્દ્રિયે સાધુ નિરુધ્યમાને
 બાહ્યાર્થભોગો મનસો વિયુજ્યતે ॥ ૧૩૨॥

તેન સ્વદૌષ્ટ્યં પરિમુચ્ય ચિત્તં
 શનૈઃ શનૈઃ શાન્તિમુપાદદાતિ ।
ચિત્તસ્ય બાહ્યાર્થવિમોક્ષમેવ
 મોક્ષં વિદુર્મોક્ષણલક્ષણજ્ઞાઃ ॥ ૧૩૩॥

દમં વિના સાધુ મનઃપ્રસાદ-
 હેતું ન વિદ્મઃ સુકરં મુમુક્ષોઃ ।
દમેન ચિત્તં નિજદોષજાતં
 વિસૃજ્ય શાન્તિં સમુપૈતિ શીઘ્રમ્ ॥ ૧૩૪॥

પ્રાણાયામાદ્ભવતિ મનસો નિશ્ચલત્વં પ્રસાદો
યસ્યાપ્યસ્ય પ્રતિનિયતદિગ્દેશકાલાદ્યવેક્ષ્ય ।
સમ્યગ્દૃષ્ટ્યા ક્વચિદપિ તયા નો દમો હન્યતે તત્
કુર્યાદ્ધીમાન્દમમનલસશ્ચિત્તશાન્ત્યૈ પ્રયત્નાત્ ॥ ૧૩૫॥

સર્વેન્દ્રિયાણાં ગતિનિગ્રહેણ
ભોગ્યેષુ દોષાદ્યવમર્શનેન ।
ઈશપ્રસાદાચ્ચ ગુરોઃ પ્રસાદા-
ચ્છાન્તિં સમાયાત્યચિરેણ ચિત્તમ્ ॥ ૧૩૬॥

આધ્યાત્મિકાદિ યદ્દુઃખં પ્રાપ્તં પ્રારબ્ધવેગતઃ ।
અચિન્તયા તત્સહનં તિતિક્ષેતિ નિગદ્યતે ॥ ૧૩૭॥

રક્ષા તિતિક્ષાસદૃશી મુમુક્ષો-
ર્ન વિદ્યતેઽસૌ પવિના ન ભિદ્યતે ।
યામેવ ધીરાઃ કવચીવ વિઘ્ના- var ધૃત્વા
ન્સર્વાંસ્તૃણીકૃત્ય જયન્તિ માયામ્ ॥ ૧૩૮॥

ક્ષમાવતામેવ હિ યોગસિદ્ધિઃ
સ્વારાજ્યલક્ષ્મીસુખભોગસિદ્ધિઃ ।
ક્ષમાવિહીના નિપતન્તિ વિઘ્નૈ-
ર્વાતૈર્હતા પર્ણચયા ઇવ દ્રુમાત્ ॥ ૧૩૯॥

તિતિક્ષયા તપોદાનં યજ્ઞસ્તીર્થં વ્રતં શ્રુતમ્ ।
ભૂતિઃ સ્વર્ગોઽપવર્ગશ્ચ પ્રાપ્યતે તત્તદર્થિભિઃ ॥ ૧૪૦॥

બ્રહ્મચર્યમહિંસા ચ સાધૂનામપ્યગર્હણમ્ ।
પરાક્ષેપાદિસહનં તિતિક્ષોરેવ સિધ્યતિ ॥ ૧૪૧॥

સાધનેષ્વપિ સર્વેષુ તિતિક્ષોત્તમસાધનમ્ ।
યત્ર વિઘ્નાઃ પલાયન્તે દૈવિકા અપિ ભૌતિકાઃ ॥ ૧૪૨॥

તિતિક્ષોરેવ વિઘ્નેભ્યસ્ત્વનિવર્તિતચેતસઃ ।
સિધ્યન્તિ સિદ્ધયઃ સર્વા અણિમાદ્યાઃ સમૃદ્ધયઃ ॥ ૧૪૩॥

તસ્માન્મુમુક્ષોરધિકા તિતિક્ષા
સમ્પાદનીયેપ્સિતકાર્યસિદ્ધ્યૈ ।
તીવ્રા મુમુક્ષા ચ મહત્યુપેક્ષા

ચોભે તિતિક્ષાસહકારિકારણમ્ ॥ ૧૪૪॥

તત્તત્કાલસમાગતામયતતેઃ શાન્ત્યૈ પ્રવૃત્તો યદિ
સ્યાત્તત્તત્પરિહારકૌષધરતસ્તચ્ચિન્તને તત્પરઃ ।
તદ્ભિક્ષુઃ શ્રવણાદિધર્મરહિતો ભૂત્વા મૃતશ્ચેત્તતઃ
કિં સિદ્ધં ફલમાપ્નુયાદુભયથા ભ્રષ્ટો ભવેત્સ્વાર્થતઃ ॥ ૧૪૫॥

યોગમભ્યસ્યતો ભિક્ષોર્યોગાચ્ચલિતચેતસઃ ।
પ્રાપ્ય પુણ્યકૃતાંલોકાનિત્યાદિ પ્રાહ કેશવઃ ॥ ૧૪૬॥

ન તુ કૃત્વૈવ સંન્યાસં તૂષ્ણીમેવ મૃતસ્ય હિ ।
પુણ્યલોકગતિં બ્રૂતે ભગવાન્ન્યાસમાત્રતઃ ॥ ૧૪૭॥

ન ચ સંન્યસનાદેવ સિદ્ધિં સમધિગચ્છતિ ।
ઇત્યનુષ્ઠેયસન્ત્યાગાત્સિદ્ધ્યભાવમુવાચ ચ ॥ ૧૪૮॥

તસ્માત્તિતિક્ષયા સોઢ્વા તત્તદ્દુઃખમુપાગતમ્ ।
કુર્યાચ્છક્ત્યનુરૂપેણ શ્રવણાદિ શનૈઃ શનૈઃ ॥ ૧૪૯॥

પ્રયોજનં તિતિક્ષાયાઃ સાધિતાયાઃ પ્રયત્નતઃ ।
પ્રાપ્તદુઃખાસહિષ્ણુત્વે ન કિઞ્ચિદપિ દૃશ્યતે ॥ ૧૫૦॥

## verses 151-209 sa.nnyAsaH

॥ ૯ ॥ સંન્યાસઃ ॥

સાધનત્વેન દૃષ્ટાનાં સર્વેષામપિ કર્મણામ્ ।
વિધિના યઃ પરિત્યાગઃ સ સંન્યાસઃ સતાં મતઃ ॥ ૧૫૧॥

ઉપરમયતિ કર્માણીત્યુપરતિશબ્દેન કથ્યતે ન્યાસઃ ।
ન્યાસેન હિ સર્વેષાં શ્રુત્યા પ્રોક્તો વિકર્મણાં ત્યાગઃ ॥ ૧૫૨॥

કર્મણા સાધ્યમાનસ્યાનિત્યત્વં શ્રૂયતે યતઃ ।
કર્મણાનેન કિં નિત્યફલેપ્સોઃ પરમાર્થિનઃ ॥ ૧૫૩॥

ઉત્પાદ્યમાપ્યં સંસ્કાર્યં વિકાર્યં પરિગણ્યતે ।
ચતુર્વિધં કર્મસાધ્યં ફલં નાન્યદિતઃ પરમ્ ॥ ૧૫૪॥

નૈતદન્યતરં બ્રહ્મ કદા ભવિતુમર્હતિ ।
સ્વતઃસિદ્ધં સર્વદાપ્તં શુદ્ધં નિર્મલમક્રિયમ્ ॥ ૧૫૫॥

ન ચાસ્ય કશ્ચિજ્જનિતેત્યાગમેન નિષિધ્યતે ।
કારણં બ્રહ્મણસ્તસ્માદ્બ્રહ્મ નોત્પાદ્યમિષ્યતે ॥ ૧૫૬॥

આપ્ત્રાપ્યયોસ્તુ ભેદશ્ચેદાપ્ત્રા ચાપ્યમવાપ્યતે ।
આપ્તૃસ્વરૂપમેવૈતદ્બ્રહ્મ નાપ્યં કદાચન ॥ ૧૫૭॥

મલિનસ્યૈવ સંસ્કારો દર્પણાદેરિહેષ્યતે ।
વ્યોમવન્નિત્યશુદ્ધસ્ય બ્રહ્મણો નૈવ સંસ્ક્રિયા ॥ ૧૫૮॥

કેન દુષ્ટેન યુજ્યેત વસ્તુ નિર્મલમક્રિયમ્ ।
યદ્યોગાદાગતં દોષં સંસ્કારો વિનિવર્તયેત્ ॥ ૧૫૯॥

નિર્ગુણસ્ય ગુણાધાનમપિ નૈવોપપદ્યતે ।
કેવલો નિર્ગુણશ્ચેતિ નૈર્ગુણ્યં શ્રૂયતે યતઃ ॥ ૧૬૦॥

સાવયવસ્ય ક્ષીરાદેર્વસ્તુનઃ પરિણામિનઃ ।
યેન કેન વિકારિત્વં સ્યાન્નો નિષ્કર્મવસ્તુનઃ ॥ ૧૬૧॥

નિષ્કલં નિષ્ક્રિયં શાન્તં નિરવદ્યં નિરઞ્જનમ્ ।
ઇત્યેવ વસ્તુનસ્તત્ત્વં શ્રુતિયુક્તિવ્યવસ્થિતમ્ ॥ ૧૬૨॥

તસ્માન્ન કર્મસાધ્યત્વં બ્રહ્મણોઽસ્તિ કુતશ્ચન ।
કર્મસાધ્યં ત્વનિત્યં હિ બ્રહ્મ નિત્યં સનાતનમ્ ॥ ૧૬૩॥

દેહાદિઃ ક્ષીયતે લોકે યથૈવં કર્મણા ચિતઃ ।
તથૈવામુષ્મિકો લોકઃ સઞ્ચિતઃ પુણ્યકર્મણા ॥ ૧૬૪॥

કૃતકત્વમનિત્યત્વે હેતુર્જાગર્તિ સર્વદા ।
તસ્માદનિત્યે સ્વર્ગાદૌ પણ્ડિતઃ કો નુ મુહ્યતિ ॥ ૧૬૫॥

જગદ્ધેતોસ્તુ નિત્યત્વં સર્વેષામપિ સમ્મતમ્ ।
જગદ્ધેતુત્વમસ્યૈવ વાવદીતિ શ્રુતિર્મુહુઃ ॥ ૧૬૬॥

ઐતદાત્મ્યમિદં સર્વં તત્સત્યમિતિ ચ શ્રુતિઃ ।
અસ્યૈવ નિત્યતાં બ્રૂતે જગદ્ધેતોઃ સતઃ સ્ફુટમ્ ॥ ૧૬૭॥

ન કર્મણા ન પ્રજયા ધનેનેતિ સ્વયં શ્રુતિઃ ।
કર્મણો મોક્ષહેતુત્વં સાક્ષાદેવ નિષેધતિ ॥ ૧૬૮॥

પ્રત્યગ્બ્રહ્મવિચારપૂર્વમુભયોરેકત્વબોધાદ્વિના

કૈવલ્યં પુરુષસ્ય સિધ્યતિ પરબ્રહ્માત્મતાલક્ષણમ્ ।
ન સ્નાનૈરપિ કીર્તનૈરપિ જપૈર્નો કૃચ્છ્રચાન્દ્રાયણૈ-
ર્નો વાપ્યધ્વરયજ્ઞદાનનિગમૈર્નો મન્ત્રતન્ત્રૈરપિ ॥ ૧૬૯॥

જ્ઞાનાદેવ તુ કૈવલ્યમિતિ શ્રુત્યા નિગદ્યતે ।
જ્ઞાનસ્ય મુક્તિહેતુત્વમન્યવ્યાવૃત્તિપૂર્વકમ્ ॥ ૧૭૦॥

વિવેકિનો વિરક્તસ્ય બ્રહ્મનિત્યત્વવેદિનઃ ।
તદ્ભાવેચ્છોરનિત્યાર્થે તત્સામગ્ર્યે કુતો રતિઃ ॥ ૧૭૧॥

તસ્માદનિત્યે સ્વર્ગાદૌ સાધનત્વેન ચોદિતમ્ ।
નિત્યં નૈમિત્તિકં ચાપિ સર્વં કર્મ સસાધનમ્ ॥ ૧૭૨॥

મુમુક્ષુણા પરિત્યાજ્યં બ્રહ્મભાવમભીપ્સુના ।
મુમુક્ષોરપિ કર્માસ્તુ શ્રવણં ચાપિ સાધનમ્ ॥ ૧૭૩॥

હસ્તવદ્વયમેતસ્ય સ્વકાર્યં સાધયિષ્યતિ ।
યથા વિજૃમ્ભતે દીપો ઋજૂકરણકર્મણા ॥ ૧૭૪॥

તથા શ્રવણજો બોધઃ પુંસો વિહિતકર્મણા ।
અતઃ સાપેક્ષિતં જ્ઞાનમથવાપિ સમુચ્ચિતમ્ ॥ ૧૭૫॥

મોક્ષસ્ય સાધનમિતિ વદન્તિ બ્રહ્મવાદિનઃ ।
મુમુક્ષોર્યુજ્યતે ત્યાગઃ કથં વિહિતકર્મણઃ ॥ ૧૭૬॥

ઇતિ શઙ્કા ન કર્તવ્યા મૂઢવત્પણ્ડિતોત્તમૈઃ ।
કર્મણઃ ફલમન્યત્તુ શ્રવણસ્ય ફલં પૃથક્ ॥ ૧૭૭॥

વૈલક્ષણ્યં ચ સામગ્ર્યોશ્ચોભયત્રાધિકારિણોઃ ।
કામી, કર્મણ્યધિકૃતો નિષ્કામી શ્રવણે મતઃ ॥ ૧૭૮॥

અર્થી સમર્થ ઇત્યાદિ લક્ષણં કર્મિણો મતમ્ ।
પરીક્ષ્ય લોકાનિત્યાદિ લક્ષણં મોક્ષકાઙ્ક્ષિણઃ ॥ ૧૭૯॥

મોક્ષાધિકારી સંન્યાસી ગૃહસ્થઃ કિલ કર્મણિ ।
કર્મણઃ સાધનં ભાર્યાસ્રુક્સ્રુવાદિપરિગ્રહઃ ॥ ૧૮૦॥

નૈવાન્યસાધનાપેક્ષા શુશ્રૂષોસ્તુ ગુરું વિના ।
ઉપર્યુપર્યહઙ્કારો વર્ધતે કર્મણા ભૃશમ્ ॥ ૧૮૧॥

અહઙ્કારસ્ય વિચ્છિત્તિઃ શ્રવણેન પ્રતિક્ષણમ્ ।

પ્રવર્તકં કર્મશાસ્ત્રં જ્ઞાનશાસ્ત્રં નિવર્તકમ્ ॥ ૧૮૨॥

ઇત્યાદિવૈપરીત્યં તત્સાધને ચાધિકારિણોઃ ।
દ્વયોઃ પરસ્પરાપેક્ષા વિદ્યતે ન કદાચન ॥ ૧૮૩॥

સામગ્ર્યોશ્ચોભયોસ્તદ્વદુભયત્રાધિકારિણોઃ ।
ઊર્ધ્વં નયતિ વિજ્ઞાનમધઃ પ્રાપયતિ ક્રિયા ॥ ૧૮૪॥

કથમન્યોન્યસાપેક્ષા કથં વાપિ સમુચ્ચયઃ ।
યથાગ્નેસ્તૃણકૂટસ્ય તેજસસ્તિમિરસ્ય ચ ॥ ૧૮૫॥

સહયોગો ન ઘટતે તથૈવ જ્ઞાનકર્મણોઃ ।
કિમૂપકુર્યાજ્જ્ઞાનસ્ય કર્મ સ્વપ્રતિયોગિનઃ ॥

યસ્ય સંનિધિમાત્રેણ સ્વયં ન સ્ફૂર્તિમૃચ્છતિ ॥ ૧૮૬॥

કોટીન્ધનાદ્રિજ્વલિતોઽપિ વહ્નિઃ
અર્કસ્ય નાર્હત્યુપકર્તુમીષત્ ।
યથા તથા કર્મસહસ્રકોટિઃ
જ્ઞાનસ્ય કિંતુ સ્વયમેવ લીયતે ॥ ૧૮૭॥

એકકર્ત્રાશ્રયૌ હસ્તૌ કર્મણ્યધિકૃતાવુભૌ ।
સહયોગસ્તયોર્યુક્તો ન તથા જ્ઞાનકર્મણોઃ ॥ ૧૮૮॥

કર્ત્રા કર્તુમકર્તું વાપ્યન્યથા કર્મ શક્યતે ।
ન તથા વસ્તુનો જ્ઞાનં કર્તૃતન્ત્રં કદાચન ॥૧૮૯
યથા વસ્તુ તથા જ્ઞાનં પ્રમાણેન વિજાયતે ।
નાપેક્ષતે ચ યત્કિઞ્ચિત્કર્મ વા યુક્તિકૌશલમ્ ॥ ૧૯૦॥

જ્ઞાનસ્ય વસ્તુતન્ત્રત્વે સંશયાદ્યુદયઃ કથમ્ ।
અતો ન વાસ્તવં જ્ઞાનમિતિ નો શઙ્ક્યતાં બુધૈઃ ॥ ૧૯૧॥

પ્રમાણાસૌષ્ઠવવૃતં સંશયાદિ ન વાસ્તવમ્ ।
શ્રુતિપ્રમાણસુષ્ઠુત્વે જ્ઞાનં ભવતિ વાસ્તવમ્ ॥ ૧૯૨॥

વસ્તુ તાવત્પરં બ્રહ્મ નિત્યં સત્યં ધ્રુવં વિભુ ।
શ્રુતિપ્રમાણે તજ્જ્ઞાનં સ્યાદેવ નિરપેક્ષકમ્ ॥ ૧૯૩॥

રૂપજ્ઞાનં યથા સમ્યગ્દૃષ્ટૌ સત્યાં ભવેત્તથા ।
શ્રુતિપ્રમાણે સત્યેવ જ્ઞાનં ભવતિ વાસ્તવમ્ ॥ ૧૯૪॥

ન કર્મ યત્કિઞ્ચિદપેક્ષતે હિ
    રૂપોપલબ્ધૌ પુરુષસ્ય ચક્ષુઃ ।
જ્ઞાનં તથૈવ શ્રવણાદિજન્યં
    વસ્તુપ્રકાશે નિરપેક્ષમેવ ॥ ૧૯૫॥

કર્તૃતન્ત્રં ભવેત્કર્મ કર્મતન્ત્રં શુભાશુભમ્ ।
પ્રમાણતન્ત્રં વિજ્ઞાનં માયાતન્ત્રમિદં જગત્ ॥ ૧૯૬॥

વિદ્યાં ચાવિદ્યાં ચેતિ સહોક્તિરિયમુપકૃદુદિતા સદ્ભિઃ ।
સત્કર્મોપાસનયોર્ન ત્વાત્મજ્ઞાનકર્મણોઃ ક્વાપિ ॥ ૧૯૭॥

નિત્યાનિત્યપદાર્થબોધરહિતો યશ્ચોભયત્ર સ્રગા-
    દ્યર્થાનામનુભૂતિલગ્નહૃદયોઽનિર્વિણ્ણબુદ્ધિર્જનઃ ।
તસ્યૈવાસ્ય જડસ્ય કર્મ વિહિતં શ્રુત્યા વિરજ્યાભિતો
    મોક્ષેચ્છોર્ન વિધીયતે તુ પરમાનન્દાર્થિનો ધીમતઃ ॥ ૧૯૮॥

મોક્ષેચ્છયા યદહરેવ વિરજ્યતેઽસૌ
    ન્યાસસ્તદૈવ વિહિતો વિદુષો મુમુક્ષોઃ ।
શ્રુત્યા તથૈવ પરયા ચ તતઃ સુધીભિઃ
    પ્રામાણિકોઽયમિતિ ચેતસિ નિશ્ચિતવ્યઃ ॥ ૧૯૯॥

સ્વાપરોક્ષસ્ય વેદાદેઃ સાધનત્વં નિષેધતિ ।
નાહં વેદૈર્ન તપસેત્યાદિના ભગવાનપિ ॥ ૨૦૦॥

પ્રવૃત્તિશ્ચ નિવૃત્તિશ્ચ દ્વે એતે શ્રુતિગોચરે ।
પ્રવૃત્ત્યા બધ્યતે જન્તુર્નિવૃત્ત્યા તુ વિમુચ્યતે ॥ ૨૦૧॥

યન્ન સ્વબન્ધોઽભિમતો મૂઢસ્યાપિ ક્વચિત્તતઃ ।
નિવૃત્તિઃ કર્મસંન્યાસઃ કર્તવ્યો મોક્ષકાઙ્ક્ષિભિઃ ॥ ૨૦૨॥

ન જ્ઞાનકર્મણોર્યસ્માત્સહયોગસ્તુ યુજ્યતે ।
તસ્માત્ત્યાજ્યં પ્રયત્નેન કર્મ જ્ઞાનેચ્છુના ધ્રુવમ્ ॥ ૨૦૩॥

ઇષ્ટસાધનતાબુદ્ધ્યા ગૃહીતસ્યાપિ વસ્તુનઃ ।
વિજ્ઞાય ફલ્ગુતાં પશ્ચાત્કઃ પુનસ્તત્પ્રતીક્ષતે ॥ ૨૦૪॥

ઉપરતિશબ્દાર્થો હ્યુપરમણં પૂર્વદૃષ્ટવૃત્તિભ્યઃ ।
સોઽયં મુખ્યો ગૌણશ્ચેતિ ચ વૃત્ત્યા દ્વિરૂપતાં ધત્તે ॥ ૨૦૫॥

વૃત્તેર્દૃશ્યપરિત્યાગો મુખ્યાર્થ ઇતિ કથ્યતે ।
ગૌણાર્થઃ કર્મસંન્યાસઃ શ્રુતેરઙ્ગતયા મતઃ ॥ ૨૦૬॥

પુંસઃ પ્રધાનસિદ્ધ્યર્થમઙ્ગસ્યાશ્રયણં ધ્રુવમ્ ।
કર્તવ્યમઙ્ગહીનં ચેત્પ્રધાનં નૈવ સિધ્યતિ ॥ ૨૦૭॥

સંન્યસ્યેત્સુવિરક્તઃ સન્નિહામુત્રાર્થતઃ સુખાત્ ।
અવિરક્તસ્ય સંન્યાસો નિષ્ફલોઽયાજ્યયાગવત્ ॥ ૨૦૮॥

સંન્યસ્ય તુ યતિઃ કુર્યાન્ન પૂર્વવિષયસ્મૃતિમ્ ।
તાં તાં તત્સ્મરણે તસ્ય જુગુપ્સા જાયતે યતઃ ॥ ૨૦૯॥

## verses 210-217 shraddhA

॥ ૧૦ ॥ શ્રદ્ધા ॥

ગુરુવેદાન્તવાક્યેષુ બુદ્ધિર્યા નિશ્ચયાત્મિકા ।
સત્યમિત્યેવ સા શ્રદ્ધા નિદાનં મુક્તિસિદ્ધયે ॥ ૨૧૦॥

શ્રદ્ધાવતામેવ સતાં પુમર્થઃ
સમીરિતઃ સિધ્યતિ નેતરેષામ્ ।
ઉક્તં સુસૂક્ષ્મં પરમાર્થતત્ત્વં
શ્રદ્ધત્સ્વ સોમ્યેતિ ચ વક્તિ વેદઃ ॥ ૨૧૧॥

શ્રદ્ધાવિહીનસ્ય તુ ન પ્રવૃત્તિઃ
પ્રવૃત્તિશૂન્યસ્ય ન સાધ્યસિદ્ધિઃ ।
અશ્રદ્ધયૈવાભિહતાશ્ચ સર્વે
મજ્જન્તિ સંસારમહાસમુદ્રે ॥ ૨૧૨॥

દૈવે ચ વેદે ચ ગુરૌ ચ મન્ત્રે
તીર્થે મહાત્મન્યપિ ભેષજે ચ ।
શ્રદ્ધા ભવત્યસ્ય યથા યથાન્ત-
સ્તથા તથા સિદ્ધિરુદેતિ પુંસામ્ ॥ ૨૧૩॥

અસ્તીત્યેવોપલબ્ધવ્યં વસ્તુસદ્ભાવનિશ્ચયાત્ ।
સદ્ભાવનિશ્ચયસ્તસ્ય શ્રદ્ધયા શાસ્ત્રસિદ્ધયા ॥ ૨૧૪॥

તસ્માચ્છ્રદ્ધા સુસમ્પાદ્યા ગુરુવેદાન્તવાક્યયોઃ ।

મુમુક્ષોઃ શ્રદ્ધાનસ્ય ફલં સિધ્યતિ નાન્યથા ॥ ૨૧૫॥

યથાર્થવાદિતા પુંસાં શ્રદ્ધાજનનકારણમ્ ।
વેદસ્યેશ્વરવાક્યત્વાદ્યથાર્થત્વે ન સંશયઃ ॥ ૨૧૬॥

મુક્તસ્યેશ્વરરૂપત્વાદ્ગુરોર્વાગપિ તાદૃશી ।
તસ્માત્તદ્વાક્યયોઃ શ્રદ્ધા સતાં સિધ્યતિ ધીમતામ્ ॥ ૨૧૭॥

## verses 218-225 Concentration

॥ ૧૧ ॥ સમ્યગાધાનમ્ ॥

શ્રુત્યુક્તાર્થાવગાહાય વિદુષા જ્ઞેયવસ્તુનિ ।
ચિત્તસ્ય સમ્યગાધાનં સમાધાનમિતીર્યતે ॥ ૨૧૮॥

ચિત્તસ્ય સાધ્યૈકપરત્વમેવ
પુમર્થસિદ્ધેર્નિયમેન કારણમ્ ।
નૈવાન્યથા સિધ્યતિ સાધ્યમીષ-
ન્મનઃપ્રમાદે વિફલઃ પ્રયત્નઃ ॥ ૨૧૯॥

ચિત્તં ચ દૃષ્ટિં કરણં તથાન્ય-
દેકત્ર બધ્નાતિ હિ લક્ષ્યભેત્તા ।
કિઞ્ચિત્પ્રમાદે સતિ લક્ષ્યભેત્તુ-
ર્બાણપ્રયોગો વિફલો યથા તથા ॥ ૨૨૦॥

સિદ્ધેશ્ચિત્તસમાધાનમસાધારણકારણમ્ ।
યતસ્તતો મુમુક્ષૂણાં ભવિતવ્યં સદામુના ॥ ૨૨૧॥

અત્યન્તતીવ્રવૈરાગ્યં ફલલિપ્સા મહત્તરા ।
તદેતદુભયં વિદ્યાત્સમાધાનસ્ય કારણમ્ ॥ ૨૨૨॥

બહિરઙ્ગં શ્રુતિઃ પ્રાહ બ્રહ્મચર્યાદિ મુક્તયે ।
શમાદિષટ્કમેવૈતદન્તરઙ્ગં વિદુર્બુધાઃ ॥ ૨૨૩॥

અન્તરઙ્ગં હિ બલવદ્બહિરઙ્ગાદ્યતસ્તતઃ ।
શમાદિષટ્કં જિજ્ઞાસોરવશ્યં ભાવ્યમાન્તરમ્ ॥ ૨૨૪॥

અન્તરઙ્ગવિહીનસ્ય કૃતશ્રવણકોટયઃ ।
ન ફલન્તિ યથા યોદ્ધુરધીરસ્યાસ્ત્રસમ્પદઃ ॥ ૨૨૫॥

## verses 226-296 mumukShutvam

॥ ૧૨ ॥ મુમુક્ષુત્વમ્ ॥

બ્રહ્માત્મૈકત્વવિજ્ઞાનાદ્યદ્વિદ્વાન્મોક્તુમિચ્છતિ ।
સંસારપાશબન્ધં તન્મુમુક્ષુત્વં નિગદ્યતે ॥ ૨૨૬॥

સાધનાનાં તુ સર્વેષાં મુમુક્ષા મૂલકારણમ્ ।
અનિચ્છોરપ્રવૃત્તસ્ય ક્વ શ્રુતિઃ ક્વ નુ તત્ફલમ્ ॥ ૨૨૭॥

તીવ્રમધ્યમમન્દાતિમન્દભેદાચ્ચતુર્વિધાઃ ।
મુમુક્ષા તત્પ્રકારોઽપિ કીર્ત્યતે શ્રૂયતાં બુધૈઃ ॥ ૨૨૮॥

તાપૈસ્ત્રિભિર્નિત્યમનેકરૂપૈઃ
    સન્તપ્યમાનો ક્ષુભિતાન્તરાત્મા ।
પરિગ્રહં સર્વમનર્થબુદ્ધ્યા
    જહાતિ સા તીવ્રતરા મુમુક્ષા ॥ ૨૨૯॥

તાપત્રયં તીવ્રમવેક્ષ્ય વસ્તુ
    દૃષ્ટ્વા કલત્રં તનયાન્વિહાતુમ્ ।
મધ્યે દ્વયોર્લોડનમાત્મનો યત્
    સૈષા મતા માધ્યમિકી મુમુક્ષા ॥ ૨૩૦॥

મોક્ષસ્ય કાલોઽસ્તિ કિમદ્ય મે ત્વરા
    ભુક્ત્વૈવ ભોગાન્કૃતસર્વકાર્યઃ ।
મુક્ત્યૈ યતિષ્યેઽહમથેતિ બુદ્ધિ-
    રેષૈવ મન્દા કથિતા મુમુક્ષા ॥ ૨૩૧॥

માર્ગે પ્રયાતુર્મણિલાભવન્મે
    લભેત મોક્ષો યદિ તર્હિ ધન્યઃ ।
ઇત્યાશયા મૂઢધિયાં મતિર્યા
    સૈષાતિમન્દાભિમતા મુમુક્ષા ॥ ૨૩૨॥

જન્માનેકસહસ્રેષુ તપસારાધિતેશ્વરઃ ।
તેન નિઃશેષનિર્ધૂતહૃદયસ્થિતકલ્મષઃ ॥ ૨૩૩॥

શાસ્ત્રવિદ્ગુણદોષજ્ઞો ભોગ્યમાત્રે વિનિસ્પૃહઃ ।

નિત્યાનિત્યપદાર્થજ્ઞો મુક્તિકામો દૃઢવ્રતઃ ॥ ૨૩૪॥

નિષ્ટપ્તમગ્નિના પાત્રમુદ્ધાસ્ય ત્વરયા યથા ।
જહાતિ ગેહં તદ્વચ્ચ તીવ્રમોક્ષેચ્છયા દ્વિજઃ ॥ ૨૩૫॥

સ એવ સદ્યસ્તરતિ સંસૃતિં ગુર્વનુગ્રહાત્ ।
યસ્તુ તીવ્રમુમુક્ષુઃ સ્યાત્સ જીવન્નેવ મુચ્યતે ॥ ૨૩૬॥

જન્માન્તરે મધ્યમસ્તુ તદન્યસ્તુ યુગાન્તરે ।
ચતુર્થઃ કલ્પકોટ્યાં વા નૈવ બન્ધાદ્વિમુચ્યતે ॥ ૨૩૭॥

નૃજન્મ જન્તોરતિદુર્લભં વિદુ-
સ્તતોઽપિ પુંસ્ત્વં ચ તતો વિવેકઃ ।
લબ્ધ્વા તદેતત્ત્રિતયં મહાત્મા
યતેત મુક્ત્યૈ સહસા વિરક્તઃ ॥ ૨૩૮॥

પુત્રમિત્રકલત્રાદિસુખં જન્મનિ જન્મનિ ।
મર્ત્યત્વં પુરુષત્વં ચ વિવેકશ્ચ ન લભ્યતે ॥ ૨૩૯॥

લબ્ધ્વા સુદુર્લભતરં નરજન્મ જન્તુ-
સ્તત્રાપિ પૌરુષમતઃ સદસદ્વિવેકમ્ ।
સમ્પ્રાપ્ય ચૈહિકસુખાભિરતો યદિ સ્યા-
દ્ધિક્તસ્ય જન્મ કુમતેઃ પુરુષાધમસ્ય ॥ ૨૪૦॥

ખાદતે મોદતે નિત્યં શુનકઃ સૂકરઃ ખરઃ ।
તેષામેષાં વિશેષઃ કો વૃત્તિર્યેષાં તુ તૈઃ સમા ॥ ૨૪૧॥

યાવન્નાશ્રયતે રોગો યાવન્નાક્રમતે જરા ।
યાવન્ન ધીર્વિપર્યેતિ યાવન્મૃત્યું ન પશ્યતિ ॥ ૨૪૨॥

તાવદેવ નરઃ સ્વસ્થઃ સારગ્રહણતત્પરઃ ।
વિવેકી પ્રયતેતાશુ ભવબન્ધવિમુક્તયે ॥ ૨૪૩॥

દેવર્ષિપિતૃમર્ત્યર્ણબન્ધમુક્તાસ્તુ કોટિશઃ ।
ભવબન્ધવિમુક્તસ્તુ યઃ કશ્ચિદ્બ્રહ્મવિત્તમઃ ॥ ૨૪૪॥

અન્તર્બન્ધેન બદ્ધસ્ય કિં બહિર્બન્ધમોચનૈઃ ।
તદન્તર્બન્ધમુક્ત્યર્થં ક્રિયતાં કૃતિભિઃ કૃતિઃ ॥ ૨૪૫॥

કૃતિપર્યવસાનૈવ મતા તીવ્રમુમુક્ષુતા ।

અન્યા તુ રજ્જનામાત્રા યત્ર નો દૃશ્યતે કૃતિઃ ॥ ૨૪૬॥

ગેહાદિસર્વમપહાય લઘુત્વબુદ્ધ્યા
 સૌખ્યેચ્છયા સ્વપતિનાઽનલમાવિવિક્ષોઃ ।
કાન્તાજનસ્ય નિયતા સુદૃઢા ત્વરા યા
 સૈષા ફલાન્તગમને કરણં મુમુક્ષોઃ ॥ ૨૪૭॥

નિત્યાનિત્યવિવેકશ્ચ દેહક્ષણિકતામતિઃ ।
મૃત્યોર્ભીતિશ્ચ તાપશ્ચ મુમુક્ષાવૃદ્ધિકારણમ્ ॥ ૨૪૮॥

શિરો વિવેકસ્ત્વત્યન્તં વૈરાગ્યં વપુરુચ્યતે ।
શમાદયઃ ષડઙ્ગાનિ મોક્ષેચ્છા પ્રાણ ઇષ્યતે ॥ ૨૪૯॥

ઈદૃશાઙ્ગસમાયુક્તો જિજ્ઞાસુર્યુક્તિકોવિદઃ ।
શૂરો મૃત્યું નિહન્ત્યેવ સમ્યગ્જ્ઞાનાસિના ધ્રુવમ્ ॥ ૨૫૦॥

ઉક્તસાધનસમ્પન્નો જિજ્ઞાસુર્યતિરાત્મનઃ ।
જિજ્ઞાસાયૈ ગુરું ગચ્છેત્સમિત્પાણિર્નયોજ્જ્વલઃ ॥ ૨૫૧॥

શ્રોત્રિયો બ્રહ્મનિષ્ઠો યઃ પ્રશાન્તઃ સમદર્શનઃ ।
નિર્મમો નિરહઙ્કારો નિર્દ્વન્દ્વો નિષ્પરિગ્રહઃ ॥ ૨૫૨
અનપેક્ષઃ શુચિર્દક્ષઃ કરુણામૃતસાગરઃ ।
એવંલક્ષણસમ્પન્નઃ સ ગુરુર્બ્રહ્મવિત્તમઃ ॥

ઉપાસાદ્યઃ પ્રયત્નેન જિજ્ઞાસોઃ સ્વાર્થસિદ્ધયે ॥ ૨૫૩॥

જન્માનેકશતૈઃ સદાદરયુજા ભક્ત્યા સમારાધિતો
 ભક્તૈર્વૈદિકલક્ષણેન વિધિના સન્તુષ્ટ ઈશ સ્વયમ્ ।
સાક્ષાચ્છ્રીગુરુરૂપમેત્ય કૃપયા દૃગ્ગોચરઃ સન્પ્રભુઃ
 તત્ત્વં સાધુ વિબોધ્ય તારયતિ તાન્સંસારદુઃખાર્ણવાત્ ॥ ૨૫૪॥

અવિદ્યાહૃદયગ્રન્થિવિમોક્ષોઽપિ ભવેદ્યતઃ ।
તમેવ ગુરુરિત્યાહુર્ગુરુશબ્દાર્થવેદિનઃ ॥ ૨૫૫॥

શિવ એવ ગુરુઃ સાક્ષાત્ ગુરુરેવ શિવઃ સ્વયમ્ ।
ઉભયોરન્તરં કિઞ્ચિન્ન દ્રષ્ટવ્યં મુમુક્ષુભિઃ ॥ ૨૫૬॥

બન્ધમુક્તં બ્રહ્મનિષ્ઠં કૃતકૃત્યં ભજેદ્ગુરુમ્ ।
યસ્ય પ્રસાદાત્સંસારસાગરો ગોષ્પદાયતે ॥ ૨૫૭॥

શુશ્રૂષયા સદા ભક્ત્યા પ્રણામૈર્વિનયોક્તિભિઃ ।
પ્રસન્નં ગુરુમાસાદ્ય પ્રષ્ટવ્યં જ્ઞેયમાત્મનઃ ॥ ૨૫૮॥

ભગવન્કરુણાસિન્ધો ભવસિન્ધોર્ભવાંસ્તરિઃ ।
યમાશ્રિત્યાશ્રમેણૈવ પરં પારં ગતા બુધાઃ ॥ ૨૫૯॥

જન્માન્તરકૃતાનન્તપુણ્યકર્મફલોદયઃ ।
અદ્ય સંનિહિતો યસ્માત્ત્વત્કૃપાપાત્રમસ્મ્યહમ્ ॥ ૨૬૦॥

સમ્પ્રીતિમક્ષ્ણોર્વદનપ્રસાદ-
માનન્દમન્તઃકરણસ્ય સદ્યઃ ।
વિલોકનં બ્રહ્મવિદસ્તનોતિ
છિનત્તિ મોહં સુગતિં વ્યનક્તિ ॥ ૨૬૧॥

હુતાશનાનાં શશિનામિનાના-
મપ્યર્બુદં વાપિ ન યન્નિહન્તુમ્ ।
શક્નોતિ તદ્ધ્વાન્તમનન્તમાન્તરં
હન્ત્યાત્મવેત્તા સકૃદીક્ષણેન ॥ ૨૬૨॥

દુષ્પારે ભવસાગરે જનિમૃતિવ્યાધ્યાદિદુઃખોત્કટે
ઘોરે પુત્રકલત્રમિત્રબહુલગ્રાહાકરે ભીકરે ।
કર્મોત્તુઙ્ગતરઙ્ગભઙ્ગનિકરૈરાકૃષ્યમાણો મુહુ-
ર્યાતાયાતગતિર્ભ્રમેણ શરણં કિઞ્ચિન્ન પશ્યામ્યહમ્ ॥ ૨૬૩॥

કેન વા પુણ્યશેષેણ તવ પાદામ્બુજદ્વયમ્ ।
દૃષ્ટવાનસ્મિ મામાર્તં મૃત્યોસ્ત્રાહિ દયાદૃશા ॥ ૨૬૪॥

વદન્તમેવં ત્વં શિષ્યં દૃષ્ટ્યૈવ દયયા ગુરુઃ ।
દદ્યાદભયમેતસ્મૈ મા ભૈષ્ટેતિ મુહુર્મુહુઃ ॥ ૨૬૫॥

વિદ્વન્મૃત્યુભયં જહીહિ ભવતો નાસ્ત્યેવ મૃત્યુઃ ક્વચિ-
ન્નિત્યસ્ય દ્વયવર્જિતસ્ય પરમાનન્દાત્મનો બ્રહ્મણઃ ।
ભ્રાન્ત્યા કિઞ્ચિદવેક્ષ્ય ભીતમનસા મિથ્યા ત્વયા કથ્યતે ।
માં ત્રાહીતિ હિ સુપ્તવત્પ્રલપનં શૂન્યાત્મકં તે મૃષા ॥ ૨૬૬॥

નિદ્રાગાઢતમોવૃતઃ કિલ જનઃ સ્વપ્ને ભુજઙ્ગાદિના
ગ્રસ્તં સ્વં સમવેક્ષ્ય યત્પ્રલપતિ ત્રાસાદ્ધતોઽસ્મીત્યલમ્ ।
આપ્તેન પ્રતિબોધિતઃ કરતલેનાતાડ્ય પૃષ્ટઃ સ્વયં

કિઞ્ચિન્નેતિ વદત્યમુષ્ય વચનં સ્યાત્તત્કિમર્થં વદ ॥ ૨૬૭॥

રજ્જોસ્તુ તત્ત્વમનવેક્ષ્ય ગૃહીતસર્પ-
ભાવઃ પુમાનયમહિર્વસતીતિ મોહાત્ ।
આક્રોશતિ પ્રતિબિભેતિ ચ કમ્પતે ત-
ન્મિથ્યૈવ નાત્ર ભુજગોઽસ્તિ વિચાર્યમાણે ॥ ૨૬૮॥

તદ્વત્ત્વયાપ્યાત્મન ઉક્તમેત-
જ્જન્માપ્યયવ્યાધિજરાધિદુઃખમ્ ।
મૃષૈવ સર્વં ભ્રમકલ્પિતં તે
સમ્યગ્વિચાર્યાત્મનિ મુઞ્ચ ભીતિમ્ ॥ ૨૬૯॥

ભવાનનાત્મનો ધર્માનાત્મન્યારોપ્ય શોચતિ ।
તદજ્ઞાનકૃતં સર્વં ભયં ત્યક્ત્વા સુખી ભવ ॥ ૨૭૦॥

શિષ્યઃ -
શ્રીમદ્ભિરુક્તં સકલં મૃષેતિ
દૃષ્ટાન્ત એવ હ્યુપપદ્યતે તત્ ।
દાર્ષ્ટાન્તિકે નૈવ ભવાદિદુઃખં
પ્રત્યક્ષતઃ સર્વજનપ્રસિદ્ધમ્ ॥ ૨૭૧॥

પ્રત્યક્ષેણાનુભૂતાર્થઃ કથં મિથ્યાત્વમર્હતિ ।
ચક્ષુષો વિષયં કુમ્ભં કથં મિથ્યા કરોમ્યહમ્ ॥ ૨૭૨॥

વિદ્યમાનસ્ય મિથ્યાત્વં કથં નુ ઘટતે પ્રભો ।
પ્રત્યક્ષં ખલુ સર્વેષાં પ્રમાણં પ્રસ્ફુટાર્થકમ્ ॥ ૨૭૩॥

મર્ત્યસ્ય મમ જન્માદિદુઃખભાજોઽલ્પજીવિનઃ ।
બ્રહ્મત્વમપિ નિત્યત્વં પરમાનન્દતા કથમ્ ॥ ૨૭૪॥

ક આત્મા કસ્ત્વનાત્મા ચ કિમુ લક્ષણમેતયોઃ ।
આત્મન્યનાત્મધર્માણામારોપઃ ક્રિયતે કથમ્ ॥ ૨૭૫॥

કિમજ્ઞાનં તદુત્પન્નભયત્યાગોઽપિ વા કથમ્ ।
કિમુ જ્ઞાનં તદુત્પન્નસુખપ્રાપ્તિશ્ચ વા કથમ્ ॥ ૨૭૬॥

સર્વમેતદ્યથાપૂર્વં કરામલકવત્સ્ફુટમ્ ।
પ્રતિપાદય મે સ્વામિન્ શ્રીગુરો કરુણાનિધે ॥ ૨૭૭॥

શ્રીગુરુઃ -

ધન્યઃ કૃતાર્થસ્ત્વમહો વિવેકઃ
　　　　શિવપ્રસાદસ્તવ વિદ્યતે મહાન્ ।
વિસૃજ્ય તુ પ્રાકૃતલોકમાર્ગં
　　　　બ્રહ્માવગન્તું યતસે યતસ્ત્વમ્ ॥ ૨૭૮॥

શિવપ્રસાદેન વિના ન સિદ્ધિઃ
　　　　શિવપ્રસાદેન વિના ન બુદ્ધિઃ ।
શિવપ્રસાદેન વિના ન યુક્તિઃ
　　　　શિવપ્રસાદેન વિના ન મુક્તિઃ ॥ ૨૭૯॥

યસ્ય પ્રસાદેન વિમુક્તસઙ્ગાઃ
　　　　શુકાદયઃ સંસૃતિબન્ધમુક્તાઃ ।
તસ્ય પ્રસાદો બહુજન્મલભ્યો
　　　　ભક્ત્યેકગમ્યો ભવમુક્તિહેતુઃ ॥ ૨૮૦॥

વિવેકો જન્તૂનાં પ્રભવતિ જનિષ્વેવ બહુષુ
　　　　પ્રસાદાદેવૈશાદ્બહુસુકૃતપાકોદયવશાત્ ।
યતસ્તસ્માદેવ ત્વમપિ પરમાર્થાવગમને
　　　　કૃતારમ્ભઃ પુંસામિદમિહ વિવેકસ્ય તુ ફલમ્ ॥ ૨૮૧॥

મર્ત્યત્વસિદ્ધેરપિ પુંસ્ત્વસિદ્ધે-
　　　　ર્વિપ્રત્વસિદ્ધેશ્ચ વિવેકસિદ્ધેઃ ।
વદન્તિ મુખ્યં ફલમેવ મોક્ષં
　　　　વ્યર્થં સમસ્તં યદિ ચેન્ન મોક્ષઃ ॥ ૨૮૨॥

પ્રશ્નઃ સમીચીનતરસ્તવાયં
　　　　યદાત્મતત્ત્વાવગમે પ્રવૃત્તિઃ ।
તતસ્તવૈતત્સકલં સમૂલં
　　　　નિવેદયિષ્યામિ મુદા શૃણુષ્વ ॥ ૨૮૩॥

મર્ત્યત્વં ત્વયિ કલ્પિતં ભ્રમવશાત્તેનૈવ જન્માદયઃ
　　　　તત્સમ્ભાવિતમેવ દુઃખમપિ તે નો વસ્તુતસ્તન્મૃષા ।
નિદ્રામોહવશાદુપાગતસુખં દુઃખં ચ કિં નુ ત્વયા
　　　　સત્યત્વેન વિલોકિતં ક્વચિદપિ બ્રૂહિ પ્રબોધાગમે ॥ ૨૮૪॥

નાશેષલોકૈરનુભૂયમાનઃ

 પ્રત્યક્ષતોઽયં સકલપ્રપઞ્ચઃ ।
કથં મૃષા સ્યાદિતિ શઙ્કનીયં
 વિચારશૂન્યેન વિમુહ્યતા ત્વયા ॥ ૨૮૫॥

દિવાન્ધદૃષ્ટેસ્તુ દિવાન્ધકારઃ
 પ્રત્યક્ષસિદ્ધોઽપિ સ કિં યથાર્થઃ ।
તદ્વદ્ભ્રમેણાવગતઃ પદાર્થો
 ભ્રાન્તસ્ય સત્યઃ સુમતેર્મૃષૈવ ॥ ૨૮૬॥

ઘટોઽયમિત્યત્ર ઘટાભિધાનઃ
 પ્રત્યક્ષતઃ કશ્ચિદુદેતિ દૃષ્ટેઃ ।
વિચાર્યમાણે સ તુ નાસ્તિ તત્ર
 મૃદસ્તિ તદ્ભાવવિલક્ષણા સા ॥ ૨૮૭॥

પ્રાદેશમાત્રઃ પરિદૃશ્યતેઽર્કઃ
 શાસ્ત્રેણ સંદર્શિતલક્ષયોજનઃ ।
માનાન્તરેણ ક્વચિદેતિ બાધાં
 પ્રત્યક્ષમપ્યત્ર હિ ન વ્યવસ્થા ॥ ૨૮૮॥

તસ્માત્ત્વયીદં ભ્રમતઃ પ્રતીતં
 મૃષૈવ નો સત્યમવેહિ સાક્ષાત્ ।
બ્રહ્મ ત્વમેવાસિ સુખસ્વરૂપં
 ત્વત્તો ન ભિન્નં વિચિનુષ્વ બુદ્ધૌ ॥ ૨૮૯॥

લોકાન્તરે વાત્ર ગુહાન્તરે વા
 તીર્થાન્તરે કર્મપરમ્પરાન્તરે ।
શાસ્ત્રાન્તરે નાસ્ત્યનુપશ્યતામિહ
 સ્વયં પરં બ્રહ્મ વિચાર્યમાણે ॥ ૨૯૦॥

તત્ત્વમાત્મસ્થમજ્ઞાત્વા મૂઢઃ શાસ્ત્રેષુ પશ્યતિ ।
ગોપઃ કક્ષગતં છાગં યથા કૂપેષુ દુર્મતિઃ ॥ ૨૯૧॥

સ્વમાત્માનં પરં મત્વા પરમાત્માનમન્યથા ।
વિમૃગ્યતે પુનઃ સ્વાત્મા બહિઃ કોશેષુ પણ્ડિતૈઃ ॥ ૨૯૨॥

વિસ્મૃત્ય વસ્તુનસ્તત્ત્વમધ્યારોપ્ય ચ વસ્તુનિ ।
અવસ્તુતાં ચ તદ્ધર્માન્મુધા શોચતિ નાન્યથા ॥ ૨૯૩॥

આત્માનાત્મવિવેકં તે વક્ષ્યામિ શૃણુ સાદરમ્ ।
યસ્ય શ્રવણમાત્રેણ મુચ્યતેઽનાત્મબન્ધનાત્ ॥ ૨૯૪॥

ઇત્યુક્ત્વાભિમુખીકૃત્ય શિષ્યં કરુણયા ગુરુઃ ।
અધ્યારોપાપવાદાભ્યાં નિષ્પ્રપઞ્ચં પ્રપઞ્ચયન્ ॥ ૨૯૫॥

સમ્યક્પ્રાબોધયત્તત્ત્વં શાસ્ત્રદૃષ્ટેન વર્ત્મના ।
સર્વેષામુપકારાય તત્પ્રકારોઽત્ર દર્શ્યતે ॥ ૨૯૬॥

# verses 297-309 Superimposition

॥ ૧૩ ॥ અધ્યારોપઃ ॥

વસ્તુન્યવસ્ત્વારોપો યઃ સોઽધ્યારોપ ઇતીર્યતે ।
અસર્પભૂતે રજ્જ્વાદૌ સર્પત્વારોપણં યથા ॥ ૨૯૭॥

વસ્તુ તાવત્પરં બ્રહ્મ સત્યજ્ઞાનાદિલક્ષણમ્ ।
ઇદમારોપિતં યત્ર ભાતિ ખે નીલતાદિવત્ ॥ ૨૯૮॥

તત્કારણં યદજ્ઞાનં સકાર્યં સદ્વિલક્ષણમ્ ।
અવસ્ત્વિત્યુચ્યતે સદ્ભિર્યસ્ય બાધા પ્રદૃશ્યતે ॥ ૨૯૯॥

અવસ્તુ તત્પ્રમાણૈર્યદ્બાધ્યતે શુક્તિરૌપ્યવત્ ।
ન બાધ્યતે યત્તદ્વસ્તુ ત્રિષુ કાલેષુ શુક્તિવત્ ॥ ૩૦૦॥

શુક્તેર્બાધા ન ખલ્વસ્તિ રજતસ્ય યથા તથા ।
અવસ્તુસંજ્ઞિતં યત્તજ્જગદધ્યાસકારણમ્ ॥ ૩૦૧॥

સદસદ્ભ્યામનિર્વાચ્યમજ્ઞાનં ત્રિગુણાત્મકમ્ ।
વસ્તુ તત્ત્વાવબોધૈકબાધ્યં તદ્ભાવલક્ષણમ્ ॥ ૩૦૨॥

મિથ્યાસમ્બન્ધતસ્તત્ર બ્રહ્મણ્યાશ્રિત્ય તિષ્ઠતિ ।
મણૌ શક્તિર્યથા તદ્વન્નૈતદાશ્રયદૂષકમ્ ॥ ૩૦૩॥

સદ્ભાવે લિઙ્ગમેતસ્ય કાર્યમેતચ્ચરાચરમ્ ।
માનં શ્રુતિઃ સ્મૃતિશ્ચાજ્ઞોઽહમિત્યનુભવોઽપિ ચ ॥ ૩૦૪॥

અજ્ઞાનં પ્રકૃતિઃ શક્તિરવિદ્યેતિ નિગદ્યતે ।
તદેતત્સન્ન ભવતિ નાસદ્વા શુક્તિરૌપ્યવત્ ॥ ૩૦૫॥

સતો ભિન્નમભિન્નં વા ન દીપસ્ય પ્રભા યથા ।
ન સાવયવમન્યદ્વા બીજસ્યાઙ્કુરવત્ક્વચિત્ ॥ ૩૦૬॥

અત એતદનિર્વાચ્યમિત્યેવ કવયો વિદુઃ ।
સમષ્ટિવ્યષ્ટિરૂપેણ દ્વિધાજ્ઞાનં નિગદ્યતે ॥ ૩૦૭॥

નાનાત્વેન પ્રતીતાનામજ્ઞાનાનામભેદતઃ ।
એકત્વેન સમષ્ટિઃ સ્યાદ્ભૂરુહાણાં વનં યથા ॥ ૩૦૮॥

ઇયં સમષ્ટિરુત્કૃષ્ટા સત્ત્વાંશોત્કર્ષતઃ પુરા ।
માયેતિ કથ્યતે તજ્જ્ઞૈઃ શુદ્ધસત્ત્વૈકલક્ષણા ॥ ૩૦૯॥

## verses 310-317 Ishvara

॥ ૧૪ ॥ ઈશ્વરઃ ॥

માયોપહિતચૈતન્યં સાભાસં સત્ત્વબૃંહિતમ્ ।
સર્વજ્ઞત્વાદિગુણકં સૃષ્ટિસ્થિત્યન્તકારણમ્ ॥ ૩૧૦॥

અવ્યાકૃતં તદવ્યક્તમીશ ઇત્યપિ ગીયતે ।
સર્વશક્તિગુણોપેતઃ સર્વજ્ઞાનાવભાસકઃ ॥ ૩૧૧॥

સ્વતન્ત્રઃ સત્યસઙ્કલ્પઃ સત્યકામઃ સ ઈશ્વરઃ ।
તસ્યૈતસ્ય મહાવિષ્ણોર્મહાશક્તેર્મહીયસઃ ॥ ૩૧૨॥

સર્વજ્ઞત્વેશ્વરત્વાદિકારણત્વાન્મનીષિણઃ ।
કારણં વપુરિત્યાહુઃ સમષ્ટિં સત્ત્વબૃંહિતમ્ ॥ ૩૧૩॥

આનન્દપ્રચુરત્વેન છાદકત્વેન કોશવત્ ।
સૈષાનન્દમયઃ કોશ ઇતીશસ્ય નિગદ્યતે ॥ ૩૧૪॥

સર્વોપરમહેતુત્વાત્સુષુપ્તિસ્થાનમિષ્યતે ।
પ્રાકૃતઃ પ્રલયો યત્ર શ્રાવ્યતે શ્રુતિભિર્મુહુઃ ॥ ૩૧૫॥

અજ્ઞાનં વ્યષ્ટ્યભિપ્રાયાદનેકત્વેન ભિદ્યતે ।
અજ્ઞાનવૃત્તયો નાના તત્તદ્ગુણવિલક્ષણાઃ ॥ ૩૧૬॥

વનસ્ય વ્યષ્ટ્યભિપ્રાયાદ્ભૂરુહા ઇત્યનેકતા ।
યથા તથૈવાજ્ઞાનસ્ય વ્યષ્ટિતઃ સ્યાદનેકતા ॥ ૩૧૭॥

# verses 318-329 Pratyagatman

॥ ૧૫ ॥ પ્રત્યગાત્મન્ ॥

વ્યષ્ટિર્મલિનસત્ત્વૈષા રજસા તમસા યુતા ।
તતો નિકૃષ્ટા ભવતિ યોપાધિઃ પ્રત્યગાત્મનઃ ॥ ૩૧૮॥

ચૈતન્યં વ્યષ્ટ્યવચ્છિન્નં પ્રત્યગાત્મેતિ ગીયતે ।
સાભાસં વ્યષ્ટ્યુપહિતં સત્તાદાત્મ્યેન તદ્ગુણૈઃ ॥ ૩૧૯॥

અભિભૂતઃ સ એવાત્મા જીવ ઇત્યભિધીયતે ।
કિઞ્ચિજ્જ્ઞત્વાનીશ્વરત્વસંસારિત્વાદિધર્મવાન્ ॥ ૩૨૦॥

અસ્ય વ્યષ્ટિરહઙ્કારકારણત્વેન કારણમ્ ।
વપુસ્તત્રાભિમાન્યાત્મા પ્રાજ્ઞ ઇત્યુચ્યતે બુધૈઃ ॥ ૩૨૧॥

પ્રાજ્ઞત્વમસ્યૈકાજ્ઞાનભાસકત્વેન સમ્મતમ્ ।
વ્યષ્ટેર્નિકૃષ્ટત્વેનાસ્ય નાનેકાજ્ઞાનભાસનમ્ ॥ ૩૨૨॥

સ્વરૂપાચ્છાદકત્વેનાપ્યાનન્દપ્રચુરત્વતઃ ।
કારણં વપુરાનન્દમયઃ કોશ ઇતીર્યતે ॥ ૩૨૩॥

અસ્યાવસ્થા સુષુપ્તિઃ સ્યાદ્યત્રાનન્દઃ પ્રકૃષ્યતે ।
એષોઽહં સુખમસ્વાપ્સં ન તુ કિઞ્ચિદવેદિષમ્ ॥ ૩૨૪॥

ઇત્યાનન્દસમુત્કર્ષઃ પ્રબુદ્ધેષુ પ્રદૃશ્યતે ।
સમષ્ટેરપિ ચ વ્યષ્ટેરુભયોર્વનવૃક્ષવત્ ॥ ૩૨૫॥

અભેદ એવ નો ભેદો જાત્યેકત્વેન વસ્તુતઃ ।
અભેદ એવ જ્ઞાતવ્યસ્તથેશપ્રાજ્ઞયોરપિ ॥ ૩૨૬॥

સત્યુપાધ્યોરભિન્નત્વે ક્વ ભેદસ્તદ્વિશિષ્ટયોઃ ।
એકીભાવે તરઙ્ગાબ્ધ્યોઃ કો ભેદઃ પ્રતિબિમ્બયોઃ ॥ ૩૨૭॥

અજ્ઞાનતદવચ્છિન્નાભાસયોરુભયોરપિ ।
આધારં શુદ્ધચૈતન્યં યત્તત્તુર્યમિતીર્યતે ॥ ૩૨૮॥

એતદેવાવિવિક્તં સદુપાધિભ્યાં ચ તદ્ગુણૈઃ ।
મહાવાક્યસ્ય વાચ્યાર્થો વિવિક્તં લક્ષ્ય ઇષ્યતે ॥ ૩૨૯॥

## verses 330-333 Ishvara,the cause of the universe

॥ ૧૬ ॥ ઈશ્વરઃ ॥

અનન્તશક્તિસમ્પન્નો માયોપાધિક ઈશ્વરઃ ।
ઈક્ષામાત્રેણ સૃજતિ વિશ્વમેતચ્ચરાચરમ્ ॥ ૩૩૦॥

અદ્વિતીયસ્વમાત્રોઽસૌ નિરુપાદાન ઈશ્વરઃ ।
સ્વયમેવ કથં સર્વં સૃજતીતિ ન શઙ્ક્યતામ્ ॥ ૩૩૧॥

નિમિત્તમપ્યુપાદાનં સ્વયમેવ ભવન્પ્રભુઃ ।
ચરાચરાત્મકં વિશ્વં સૃજત્યવતિ લુમ્પતિ ॥ ૩૩૨॥

સ્વપ્રાધાન્યેન જગતો નિમિત્તમપિ કારણમ્ ।
ઉપાદાનં તથોપાધિપ્રાધાન્યેન ભવત્યયમ્ ॥ ૩૩૩॥

## verses 334-337 Creation of the Five Elements

॥ ૧૭ ॥ પઞ્ચભૂતસૃષ્ટિઃ ॥

યથા લૂતા નિમિત્તં ચ સ્વપ્રધાનતયા ભવેત્ ।
સ્વશરીરપ્રધાનત્વેનોપાદાનં તથેશ્વરઃ ॥ ૩૩૪॥

તમઃપ્રધાનપ્રકૃતિવિશિષ્ટાત્પરમાત્મનઃ ।
અભૂત્સકાશાદાકાશમાકાશાદ્વાયુરુચ્યતે ॥ ૩૩૫॥

વાયોરગ્નિસ્તથૈવાગ્નેરાપોઽદ્ભ્યઃ પૃથિવી ક્રમાત્ ।
શક્તેસ્તમઃપ્રધાનત્વં તત્કાર્યે જાડ્યદર્શનાત્ ॥ ૩૩૬॥

આરભન્તે કાર્યગુણાન્યે કારણગુણા હિ તે ।
એતાનિ સૂક્ષ્મભૂતાનિ ભૂતમાત્રા અપિ ક્રમાત્ ॥ ૩૩૭॥

## verses 338-341 The Subtle Body

॥ ૧૮ ॥ સૂક્ષ્મદેહઃ ॥

એતેભ્યઃ સૂક્ષ્મભૂતેભ્યઃ સૂક્ષ્મદેહા ભવન્ત્યપિ ।
સ્થૂલાન્યપિ ચ ભૂતાનિ ચાન્યોન્યાંશવિમેલનાત્ ॥ ૩૩૮॥

અપઞ્ચીકૃતભૂતેભ્યો જાતં સપ્તદશાઙ્ગકમ્ ।
સંસારકારણં લિઙ્ગમાત્મનો ભોગસાધનમ્ ॥ ૩૩૯॥

શ્રોત્રાદિપઞ્ચકં ચૈવ વાગાદીનાં ચ પઞ્ચકમ્ ।
પ્રાણાદિપઞ્ચકં બુદ્ધિમનસી લિઙ્ગમુચ્યતે ॥ ૩૪૦॥

શ્રોત્રત્વક્ચક્ષુર્જિહ્વાઘ્રાણાનિ પઞ્ચ જાતાનિ ।
આકાશાદીનાં સત્ત્વાંશેભ્યો ધીન્દ્રિયાણ્યનુક્રમતઃ ॥ ૩૪૧॥

## verses 342-349 The Internal Organ

॥ ૧૯ ॥ અન્તઃકરણમ્ ॥

આકાશાદિગતાઃ પઞ્ચ સાત્ત્વિકાંશાઃ પરસ્પરમ્ ।
મિલિત્વૈવાન્તઃકરણમભવત્સર્વકારણમ્ ॥ ૩૪૨॥

પ્રકાશકત્વાદેતેષાં સાત્ત્વિકાંશત્વમિષ્યતે ।
પ્રકાશકત્વં સત્ત્વસ્ય સ્વચ્છત્વેન યતસ્તતઃ ॥ ૩૪૩॥

તદન્તઃકરણં વૃત્તિભેદેન સ્યાચ્ચતુર્વિધમ્ ।
મનો બુદ્ધિરહઙ્કારશ્ચિત્તં ચેતિ તદુચ્યતે ॥ ૩૪૪॥

સઙ્કલ્પાન્મન ઇત્યાહુર્બુદ્ધિરર્થસ્ય નિશ્ચયાત્ ।
અભિમાનાદહઙ્કારશ્ચિત્તમર્થસ્ય ચિન્તનાત્ ॥ ૩૪૫॥

મનસ્યપિ ચ બુદ્ધૌ ચ ચિત્તાહઙ્કારયોઃ ક્રમાત્ ।
અન્તર્ભાવોઽત્ર બોદ્ધવ્યો લિઙ્ગલક્ષણસિદ્ધયે ॥ ૩૪૬॥

ચિન્તનં ચ મનોધર્મઃ સઙ્કલ્પાદિર્યથા તથા ।
અન્તર્ભાવો મનસ્યેવ સમ્યક્ચિત્તસ્ય સિધ્યતિ ॥ ૩૪૭॥

દેહાદાવહમિત્યેવ ભાવો દૃઢતરો ધિયઃ ।
દૃશ્યતેઽહઙ્કૃતેસ્તસ્માદન્તર્ભાવોઽત્ર યુજ્યતે ॥ ૩૪૮॥

તસ્માદેવ તુ બુદ્ધેઃ કર્તૃત્વં તદિતરસ્ય કરણત્વમ્ ।
સિદ્ધ્યત્યાત્મન ઉભયં વિદ્યાત્સંસારકારણં મોહાત્ ॥ ૩૪૯॥

## verses 350-354 VijnAnamayakosha

॥ ૨૦ ॥ વિજ્ઞાનમયકોશઃ ॥

વિજ્ઞાનમયકોશઃ સ્યાત્ બુદ્ધિર્જ્ઞાનેન્દ્રિયૈઃ સહ ।
વિજ્ઞાનપ્રચુરત્વેનાપ્યાચ્છાદકતયાત્મનઃ ॥ ૩૫૦॥

વિજ્ઞાનમયકોશોઽયમિતિ વિદ્વદ્ભિરુચ્યતે ।
અયં મહાનહઙ્કારવૃત્તિમાન્કર્તૃલક્ષણઃ ॥ ૩૫૧॥

અહં મમેત્યેવ સદાભિમાનં
      દેહેન્દ્રિયાદૌ કુરુતે ગૃહાદૌ ।
જીવાભિમાનઃ પુરુષોઽયમેવ
      કર્તા ચ ભોક્તા ચ સુખી ચ દુઃખી ॥ ૩૫૨॥

સ્વવાસનાપ્રેરિત એવ નિત્યં
      કરોતિ કર્મોભયલક્ષણં ચ ।
ભુઙ્ક્તે તદુત્પન્નફલં વિશિષ્ટં
      સુખં ચ દુઃખં ચ પરત્ર ચાત્ર ॥ ૩૫૩॥

નાનાયોનિસહસ્રેષુ જાયમાનો મુહુર્મુહુઃ ।
મ્રિયમાણો ભ્રમત્યેષ જીવઃ સંસારમણ્ડલે ॥ ૩૫૪॥

## verses 355-374 Manomayakosha

॥ ૨૧ ॥ મનોમયકોશઃ ॥

મનો મનોમયઃ કોશો ભવેજ્જ્ઞાનેન્દ્રિયૈઃ સહ ।
પ્રાચુર્યં મનસો યત્ર દૃશ્યતેઽસૌ મનોમયઃ ॥ ૩૫૫॥

ચિન્તાવિષાદહર્ષાદ્યાઃ કામાદ્યા અસ્ય વૃત્તયઃ ।
મનુતે મનસૈવૈષ ફલં કામયતે બહિઃ ।
યતતે કુરુતે ભુઙ્ક્તે તન્મનઃ સર્વકારણમ્ ॥ ૩૫૬॥

મનો હ્યમુષ્ય પ્રવણસ્ય હેતુ-
      રન્તર્બહિશ્ચાર્થમનેન વેત્તિ ।
શ ृણોતિ જિઘ્રત્યમુનૈવ ચેક્ષતે
      વક્તિ સ્પૃશત્યત્તિ કરોતિ સર્વમ્ ॥ ૩૫૭॥

બન્ધશ્ચ મોક્ષો મનસૈવ પુંસા-
મર્થોઽપ્યનર્થોઽપ્યમુનૈવ સિધ્યતિ ।
શુદ્ધેન મોક્ષો મલિનેન બન્ધો
વિવેકતોઽર્થોઽપ્યવિવેકતોઽન્યઃ ॥ ૩૫૮॥

રજસ્તમોભ્યાં મલિનં ત્વશુદ્ધ-
મજ્ઞાનજં સત્ત્વગુણેન રિક્તમ્ ।
મનસ્તમોદોષસમન્વિતત્વા-
જ્જડત્વમોહાલસતાપ્રમાદૈઃ ।
તિરસ્કૃતં સન્ન તુ વેત્તિ વાસ્તવં
પદાર્થતત્ત્વં હ્યુપલભ્યમાનમ્ ॥ ૩૫૯॥

રજોદોષૈર્યુક્તં યદિ ભવતિ વિક્ષેપકગુણૈઃ
પ્રતીપૈઃ કામાદ્યૈરનિશમભિભૂતં વ્યથયતિ ।
કથઞ્ચિત્સૂક્ષ્માર્થાવગતિમદપિ ભ્રામ્યતિ ભૃશં
મનોદીપો યદ્વત્પ્રબલમરુતા ધ્વસ્તમહિમા ॥ ૩૬૦॥

તતો મુમુક્ષુર્ભવબન્ધમુક્ત્યૈ
રજસ્તમોભ્યાં ચ તદીયકાર્યૈઃ ।
વિયોજ્ય ચિત્તં પરિશુદ્ધસત્ત્વં
પ્રિયં પ્રયત્નેન સદૈવ કુર્યાત્ ॥ ૩૬૧॥

ગર્ભાવાસજનિપ્રણાશનજરાવ્યાધ્યાદિષુ પ્રાણિનાં
યદ્દુઃખં પરિદૃશ્યતે ચ નરકે તચ્ચિન્તયિત્વા મુહુઃ ।
દોષાનેવ વિલોક્ય સર્વવિષયેષ્વાશાં વિમુચ્યાભિત-
શ્ચિત્તગ્રન્થિવિમોચનાય સુમતિઃ સત્ત્વં સમાલમ્બતામ્ ॥ ૩૬૨॥

યમેષુ નિરતો યસ્તુ નિયમેષુ ચ યત્નતઃ ।
વિવેકિનસ્તસ્ય ચિત્તં પ્રસાદમધિગચ્છતિ ॥ ૩૬૩॥

આસુરીં સમ્પદં ત્યક્ત્વા ભજેદ્યો દૈવસમ્પદમ્ ।
મોક્ષૈકકાઙ્ક્ષયા નિત્યં તસ્ય ચિત્તં પ્રસીદતિ ॥ ૩૬૪॥

પરદ્રવ્યપરદ્રોહપરનિન્દાપરસ્ત્રિયઃ ।
નાલમ્બતે મનો યસ્ય તસ્ય ચિત્તં પ્રસીદતિ ॥ ૩૬૫॥

આત્મવત્સર્વભૂતેષુ યઃ સમત્વેન પશ્યતિ ।

સુખં દુઃખં વિવેકેન તસ્ય ચિત્તં પ્રસીદતિ ॥ ૩૬૬॥

અત્યન્તં શ્રદ્ધયા ભક્ત્યા ગુરુમીશ્વરમાત્મનિ ।
યો ભજત્યનિશં ક્ષાન્તસ્તસ્ય ચિત્તં પ્રસીદતિ ॥ ૩૬૭॥

શિષ્ટાન્નમીશાર્ચનમાર્યસેવાં
　　તીર્થાટનં સ્વાશ્રમધર્મનિષ્ઠામ્ ।
યમાનુષક્તિં નિયમાનુવૃત્તિં
　　ચિત્તપ્રસાદાય વદન્તિ તજ્જ્ઞાઃ ॥ ૩૬૮॥

કટ્વમ્લલવણાત્યુષ્ણતીક્ષ્ણરૂક્ષવિદાહિનામ્ ।
પૂતિપર્યુષિતાદીનાં ત્યાગઃ સત્ત્વાય કલ્પતે ॥ ૩૬૯॥

શ્રુત્યા સત્ત્વપુરાણાનાં સેવયા સત્ત્વવસ્તુનઃ ।
અનુવૃત્ત્યા ચ સાધૂનાં સત્ત્વવૃત્તિઃ પ્રજાયતે ॥ ૩૭૦॥

યસ્ય ચિત્તં નિર્વિષયં હૃદયં યસ્ય શીતલમ્ ।
તસ્ય મિત્રં જગત્સર્વં તસ્ય મુક્તિઃ કરસ્થિતા ॥ ૩૭૧॥

હિતપરિમિતભોજી નિત્યમેકાન્તસેવી
　　સકૃદુચિતહિતોક્તિઃ સ્વલ્પનિદ્રાવિહારઃ ।
અનુનિયમનશીલો યો ભજત્યુક્તકાલે
　　સ લભત ઇહ શીઘ્રં સાધુ ચિત્તપ્રસાદમ્ ॥ ૩૭૨॥

ચિત્તપ્રસાદેન વિનાવગન્તું
　　બન્ધં ન શક્નોતિ પરાત્મતત્ત્વમ્ ।
તત્ત્વાવગત્યા તુ વિના વિમુક્તિ-
　　ર્ન સિધ્યતિ બ્રહ્મસહસ્રકોટિષુ ॥ ૩૭૩॥

મનઃપ્રમાદઃ પુરુષસ્ય બન્ધો
　　મનઃપ્રસાદો ભવબન્ધમુક્તિઃ ।
મનઃપ્રસાદાધિગમાય તસ્મા-
　　ન્મનોનિરાસં વિદધીત વિદ્વાન્ ॥ ૩૭૪॥

## verses 375-408 Pranamayakosha

॥ ૨૨ ॥ પ્રાણમયકોશઃ ॥

પઞ્ચાનામેવ ભૂતાનાં રજોંશેભ્યોઽભવન્ ક્રમાત્ ।
વાક્પાણિપાદપાયૂપસ્થાનિ કર્મેન્દ્રિયાણ્યનુ ॥ ૩૭૫॥

સમસ્તેભ્યો રજોંશેભ્યો વ્યોમાદીનાં ક્રિયાત્મકાઃ ।
પ્રાણાદયઃ સમુત્પન્નાઃ પઞ્ચાપ્યાન્તરવાયવઃ ॥ ૩૭૬॥

પ્રાણઃ પ્રાગ્ગમનેન સ્યાદપાનોઽર્વાગ્ગમનેન ચ ।
વ્યાનસ્તુ વિષ્વગ્ગમનાદુત્ક્રાન્ત્યોદાન ઇષ્યતે ॥ ૩૭૭॥

અશિતાન્નરસાદીનાં સમીકરણધર્મતઃ ।
સમાન ઇત્યભિપ્રેતો વાયુર્યસ્તેષુ પઞ્ચમઃ ॥ ૩૭૮॥

ક્રિયૈવ દિશ્યતે પ્રાયઃ પ્રાણકર્મેન્દ્રિયેષ્વલમ્ ।
તતસ્તેષાં રજોંશેભ્યો જનિરઙ્ગીકૃતા બુધૈઃ ॥ ૩૭૯॥

રાજસીં તુ ક્રિયાશક્તિં તમઃશક્તિં જડાત્મિકામ્ ।
પ્રકાશરૂપિણીં સત્ત્વશક્તિં પ્રાહુર્મહર્ષયઃ ॥ ૩૮૦॥

એતે પ્રાણાદયઃ પઞ્ચ પઞ્ચકર્મેન્દ્રિયૈઃ સહ ।
ભવેત્પ્રાણમયઃ કોશઃ સ્થૂલો યેનૈવ ચેષ્ટતે ॥ ૩૮૧॥

યદ્યન્નિષ્પાદ્યતે કર્મ પુણ્યં વા પાપમેવ વા ।
વાગાદિભિશ્ચ વપુષા તત્પ્રાણમયકર્તૃકમ્ ॥ ૩૮૨॥

વાયુનોચ્ચાલિતો વૃક્ષો નાનારૂપેણ ચેષ્ટતે ।
તસ્મિન્વિનિશ્ચલે સોઽપિ નિશ્ચલઃ સ્યાદ્યથા તથા ॥ ૩૮૩॥

પ્રાણકર્મેન્દ્રિયૈર્દેહઃ પ્રેર્યમાણઃ પ્રવર્તતે ।
નાનાક્રિયાસુ સર્વત્ર વિહિતાવિહિતાદિષુ ॥ ૩૮૪॥

કોશત્રયં મિલિત્વૈતદ્વપુઃ સ્યાત્સૂક્ષ્મમાત્મનઃ ।
અતિસૂક્ષ્મતયા લીનસ્યાત્મનો ગમકત્વતઃ ॥ ૩૮૫॥

લિઙ્ગમિત્યુચ્યતે સ્થૂલાપેક્ષયા સૂક્ષ્મમિષ્યતે ।
સર્વં લિઙ્ગવપુર્જાતમેકધીવિષયત્વતઃ ॥ ૩૮૬॥

સમષ્ટિઃ સ્યાત્તરુગણઃ સામાન્યેન વનં યથા ।
એતત્સમષ્ટ્યુપહિતં ચૈતન્યં સફલં જગુઃ ॥ ૩૮૭॥

હિરણ્યગર્ભઃ સૂત્રાત્મા પ્રાણ ઇત્યપિ પણ્ડિતાઃ ।
હિરણ્મયે બુદ્ધિગર્ભે પ્રચકાસ્તિ હિરણ્યવત્ ॥ ૩૮૮॥

હિરણ્યગર્ભ ઇત્યસ્ય વ્યપદેશસ્તતો મતઃ ।
સમસ્ત લિઙ્ગદેહેષુ સૂત્રવન્મણિપઙ્ક્તિષુ ।
વ્યાપ્ય સ્થિતત્વાત્સૂત્રાત્મા પ્રાણનાત્પ્રાણ ઉચ્યતે ॥ ૩૮૯॥

નૈકધીવિષયત્વેન લિઙ્ગં વ્યષ્ટિર્ભવત્યથ ।
યદેતદ્વ્યષ્ટ્યુપહિતં ચિદાભાસસમન્વિતમ્ ॥ ૩૯૦॥

ચૈતન્યં તૈજસ ઇતિ નિગદન્તિ મનીષિણઃ ।
તેજોમયાન્તઃકરણોપાધિત્વેનૈવ તૈજસઃ ॥ ૩૯૧॥

સ્થૂલાત્સૂક્ષ્મતયા વ્યષ્ટિરસ્ય સૂક્ષ્મવપુર્મતમ્ ।
અસ્ય જાગરસંસ્કારમયત્વાદ્વપુરુચ્યતે ॥ ૩૯૨॥

સ્વપ્ને જાગરકાલીનવાસનાપરિકલ્પિતાન્ ।
તૈજસો વિષયાન્ભુઙ્ક્તે સૂક્ષ્માર્થાન્સૂક્ષ્મવૃત્તિભિઃ ॥ ૩૯૩॥

સમષ્ટેરપિ ચ વ્યષ્ટેઃ સામાન્યેનૈવ પૂર્વવત્ ।
અભેદ એવ જ્ઞાતવ્યો જાત્યેકત્વે કુતો ભિદા ॥ ૩૯૪॥

દ્વયોરુપાધ્યોરેકત્વે તયોરપ્યભિમાનિનોઃ ।
સૂત્રાત્મનસ્તૈજસસ્યાપ્યભેદઃ પૂર્વવન્મતઃ ॥ ૩૯૫॥

એવં સૂક્ષ્મપ્રપઞ્ચસ્ય પ્રકારઃ શાસ્ત્રસમ્મતઃ ।
અથ સ્થૂલપ્રપઞ્ચસ્ય પ્રકારઃ કથ્યતે શૃણુ ॥ ૩૯૬॥

તાન્યેવ સૂક્ષ્મભૂતાનિ વ્યોમાદીનિ પરસ્પરમ્ ।
પઞ્ચીકૃતાનિ સ્થૂલાનિ ભવન્તિ શૃણુ તત્ક્રમમ્ ॥ ૩૯૭॥

ખાદીનાં ભૂતમેકૈકં સમમેવ દ્વિધા દ્વિધા ।
વિભજ્ય ભાગં તત્રાદ્યં ત્યક્ત્વા ભાગં દ્વિતીયકમ્ ॥ ૩૯૮॥

ચતુર્ધા સુવિભજ્યાથ તમેકૈકં વિનિક્ષિપેત્ ।
ચતુર્ણાં પ્રથમે ભાગે ક્રમેણ સ્વાર્ધમન્તરા ॥ ૩૯૯॥

તતો વ્યોમાદિભૂતાનાં ભાગાઃ પઞ્ચ ભવન્તિ તે ।
સ્વસ્વાર્ધભાગેનાન્યેભ્યઃ પ્રાપ્તં ભાગચતુષ્ટયમ્ ॥ ૪૦૦॥

સંયોજ્ય સ્થૂલતાં યાન્તિ વ્યોમાદીનિ યથાક્રમમ્ ।
અમુષ્ય પઞ્ચીકરણસ્યાપ્રામાણ્યં ન શઙ્ક્યતામ્ ॥ ૪૦૧॥

ઉપલક્ષણમસ્યાપિ તત્ત્રિવૃત્કરણશ્રુતિઃ ।
પઞ્ચાનામપિ ભૂતાનાં શ્રૂયતેઽન્યત્ર સમ્ભવઃ ॥ ૪૦૨ ॥

તતઃ પ્રામાણિકં પઞ્ચીકરણં મન્યતાં બુધૈઃ ।
પ્રત્યક્ષાદિવિરોધઃ સ્યાદન્યથા ક્રિયતે યદિ ॥ ૪૦૩ ॥

આકાશવાય્વોર્ધર્મસ્તુ વહ્ન્યાદાવુપલભ્યતે ।
યથા તથાકાશવાય્વોર્નાગ્ન્યાદેર્ધર્મ ઈક્ષ્યતે ॥ ૪૦૪ ॥

અતોઽપ્રામાણિકમિતિ ન કિઞ્ચિદપિ ચિન્ત્યતામ્ ।
ખાંશવ્યાપ્તિશ્ચ ખવ્યાપ્તિર્વિદ્યતે પાવકાદિષુ ॥ ૪૦૫ ॥

તેનોપલભ્યતે શબ્દઃ કારણસ્યાતિરેકતઃ ।
તથા નભસ્વતો ધર્મોઽપ્યગ્ન્યાદાવુપલભ્યતે ॥ ૪૦૬ ॥

ન તથા વિદ્યતે વ્યાપ્તિર્વહ્ન્યાદેઃ ખનભસ્વતોઃ ।
સૂક્ષ્મત્વાદંશકવ્યાપ્તેસ્તદ્ધર્મો નોપલભ્યતે ॥ ૪૦૭ ॥

કારણસ્યાનુરૂપેણ કાર્યં સર્વત્ર દૃશ્યતે ।
તસ્માત્પ્રામાણ્યમેષ્ટવ્યં બુધૈઃ પઞ્ચીકૃતેરપિ ॥ ૪૦૮ ॥

## verses 409-416 The quintuplication of the Elements

॥ ૨૩ ॥ પઞ્ચીકરણમ્ ॥

અનેનોદ્ભૂતગુણકં ભૂતં વક્ષ્યેઽવધારય ।
શબ્દૈકગુણમાકાશં શબ્દસ્પર્શગુણોઽનિલઃ ॥ ૪૦૯ ॥

તેજઃ શબ્દસ્પર્શરૂપૈર્ગુણવત્કારણં ક્રમાત્ ।
આપશ્ચતુર્ગુણઃ શબ્દસ્પર્શરૂપરસૈઃ ક્રમાત્ ॥ ૪૧૦ ॥

એતૈશ્ચતુર્ભિર્ગન્ધેન સહ પઞ્ચગુણા મહી ।
આકાશાંશતયા શ્રોત્રં શબ્દં ગૃહ્ણાતિ તદ્ગુણમ્ ॥ ૪૧૧ ॥

ત્વઙ્મારુતાંશકતયા સ્પર્શં ગૃહ્ણાતિ તદ્ગુણમ્ ।
તેજોંશકતયા ચક્ષૂ રૂપં ગૃહ્ણાતિ તદ્ગુણમ્ ॥ ૪૧૨ ॥

અબંશકતયા જિહ્વા રસં ગૃહ્ણાતિ તદ્ગુણમ્ ।
ભૂમ્યંશકતયા ઘ્રાણં ગન્ધં ગૃહ્ણાતિ તદ્ગુણમ્ ॥ ૪૧૩ ॥

કરોતિ ખાંશકતયા વાક્ શબ્દોચ્ચારણક્રિયામ્ ।
વાય્વંશકતયા પાદૌ ગમનાદિક્રિયાપરૌ ॥ ૪૧૪॥

તેજોંશકતયા પાણી વહ્ન્યાદ્યર્ચનતત્પરૌ ।
જલાંશકતયોપસ્થો રેતોમૂત્રવિસર્ગકૃત્ ॥ ૪૧૫॥

ભૂમ્યંશકતયા પાયુઃ કઠિનં મલમુત્સૃજેત્ ।
શ્રોત્રસ્ય દૈવતં દિક્સ્યાત્ત્વચો વાયુર્દૃશો રવિઃ ॥ ૪૧૬॥

## verses 417-429 The deities presiding over the senses

॥ ૨૪ ॥ ઇન્દ્રિયદેવતાઃ ॥

જિહ્વાયા વરુણો દૈવં ઘ્રાણસ્ય ત્વશ્વિનાવુભૌ ।
વાચોઽગ્નિર્હસ્તયોરિન્દ્રઃ પાદયોસ્તુ ત્રિવિક્રમઃ ॥ ૪૧૭॥

પાયોર્મૃત્યુરુપસ્થસ્ય ત્વધિદૈવં પ્રજાપતિઃ ।
મનસો દૈવતં ચન્દ્રો બુદ્ધેર્દૈવં બૃહસ્પતિઃ ॥ ૪૧૮॥

રુદ્રસ્ત્વહઙ્કૃતેર્દૈવં ક્ષેત્રજ્ઞશ્ચિત્તદૈવતમ્ ।
દિગાદ્યા દેવતાઃ સર્વાઃ ખાદિસત્ત્વાંશસમ્ભવાઃ ॥ ૪૧૯॥

સમ્મિતા ઇન્દ્રિયસ્થાનેષ્વિન્દ્રિયાણાં સમન્તતઃ ।
નિગૃહ્ણન્ત્યનુગૃહ્ણન્તિ પ્રાણિકર્માનુરૂપતઃ ॥ ૪૨૦॥

શરીરકરણગ્રામપ્રાણાહમધિદેવતાઃ ।
પઞ્ચૈતે હેતવઃ પ્રોક્તા નિષ્પત્તૌ સર્વકર્મણામ્ ॥ ૪૨૧॥

કર્માનુરૂપેણ ગુણોદયો ભવે-
    દ્ગુણાનુરૂપેણ મનઃપ્રવૃત્તિઃ ।
મનોનુવૃત્તૈરુભયાત્મકેન્દ્રિયૈ-
    ર્નિર્વર્ત્યતે પુણ્યમપુણ્યમત્ર ॥ ૪૨૨॥

કરોતિ વિજ્ઞાનમયોઽભિમાનં
    કર્તાહમેવેતિ તદાત્મના સ્થિતઃ ।
આત્મા તુ સાક્ષી ન કરોતિ કિઞ્ચિ-
    ન્ન કારયત્યેવ તટસ્થવત્સદા ॥ ૪૨૩॥

દ્રષ્ટા શ્રોતા વક્તા કર્તા ભોક્તા ભવત્યહઙ્કારઃ ।

સ્વયમેતદ્વિકૃતીનાં સાક્ષી નિર્લેપ એવાત્મા ॥ ૪૨૪॥

આત્મનઃ સાક્ષિમાત્રત્વં ન કર્તૃત્વં ન ભોક્તૃતા ।
રવિવત્પ્રાણિભિર્લોકે ક્રિયમાણેષુ કર્મસુ ॥ ૪૨૫॥

ન હ્યર્કઃ કુરુતે કર્મ ન કારયતિ જન્તવઃ ।
સ્વસ્વભાવાનુરોધેન વર્તન્તે સ્વસ્વકર્મસુ ॥ ૪૨૬॥

તથૈવ પ્રત્યગાત્માપિ રવિવન્નિષ્ક્રિયાત્મના ।
ઉદાસીનતયૈવાસ્તે દેહાદીનાં પ્રવૃત્તિષુ ॥ ૪૨૭॥

અજ્ઞાત્વૈવં પરં તત્ત્વં માયામોહિતચેતસઃ ।
સ્વાત્મન્યારોપયન્ત્યેતત્કર્તૃત્વાદ્યન્યગોચરમ્ ॥ ૪૨૮॥

આત્મસ્વરૂપમવિચાર્ય વિમૂઢબુદ્ધિ-
રારોપયત્યખિલમેતદનાત્મકાર્યમ્ ।
સ્વાત્મન્યસઙ્ગચિતિ નિષ્ક્રિય એવ ચન્દ્રે
દૂરસ્થમેઘકૃતધાવનવદ્ભ્રમેણ ॥ ૪૨૯॥

## verses 430-433 The Creation of the gross Universe

॥ ૨૫ ॥ જગદુત્પત્તિઃ ॥

આત્માનાત્મવિવેકં સ્ફુટતરમગ્રે નિવેદયિષ્યામઃ ।
ઇમમાકર્ણય વિદ્વન્ જગદુત્પત્તિપ્રકારમાવૃત્ત્યા ॥ ૪૩૦॥

પઞ્ચીકૃતેભ્યઃ ખાદિભ્યો ભૂતેભ્યસ્ત્વીક્ષયેશિતુઃ ।
સમુત્પન્નમિદં સ્થૂલં બ્રહ્માણ્ડં સચરાચરમ્ ॥ ૪૩૧॥

વ્રીહ્યાદ્યોષધયઃ સર્વા વાયુતેજોમ્બુભૂમયઃ ।
સર્વેષામપ્યભૂદન્નં ચતુર્વિધશરીરિણામ્ ॥ ૪૩૨॥

કેચિન્મારુતભોજનાઃ ખલુ પરે ચન્દ્રાર્કતેજોઽશનાઃ
કેચિત્તોયકણાશિનોઽપરિમિતાઃ કેચિત્તુ મૃદ્ભક્ષકાઃ ।
કેચિત્પર્ણશિલાતૃણાદનપરાઃ કેચિત્તુ માંસાશિનઃ
કેચિદ્વ્રીહિયવાન્નભોજનપરા જીવન્ત્યમી જન્તવઃ ॥ ૪૩૩॥

## verses 434-456 The four different kinds of beings

॥ ૨૬ ॥ ચતુર્વિધં ભૂતજાતમ્ ॥

જરાયુજાણ્ડજસ્વેદજોદ્ભિજ્જાદ્યાશ્ચતુર્વિધાઃ ।
સ્વસ્વકર્માનુરૂપેણ જાતાસ્તિષ્ઠન્તિ જન્તવઃ ॥ ૪૩૪॥

યત્ર જાતા જરાયુભ્યસ્તે નરાદ્યા જરાયુજાઃ ।
અણ્ડજાસ્તે સ્યુરણ્ડેભ્યો જાતા યે વિહગાદયઃ ॥ ૪૩૫॥

સ્વેદાજ્જાતાઃ સ્વેદજાસ્તે યૂકા લૂક્ષાદયોઽપિ ચ ।
ભૂમિમુદ્ભિદ્ય યે જાતા ઉદ્ભિજ્જાસ્તે દ્રુમાદયઃ ॥ ૪૩૬॥

ઇદં સ્થૂલવપુર્જાતં ભૌતિકં ચ ચતુર્વિધમ્ ।
સામાન્યેન સમષ્ટિઃ સ્યાદેકધીવિષયત્વતઃ ॥ ૪૩૭॥

એતત્સમષ્ટ્યવચ્છિન્નં ચૈતન્યં ફલસંયુતમ્ ।
પ્રાહુર્વૈશ્વાનર ઇતિ વિરાડિતિ ચ વૈદિકાઃ ॥ ૪૩૮॥

વૈશ્વાનરો વિશ્વનરેષ્વાત્મત્વેનાભિમાનતઃ ।
વિરાટ્ સ્યાદ્વિવિધત્વેન સ્વયમેવ વિરાજનાત્ ॥ ૪૩૯॥

ચતુર્વિધં ભૂતજાતં તત્તજ્જાતિવિશેષતઃ ।
નૈકધીવિષયત્વેન પૂર્વવદ્વ્યષ્ટિરિષ્યતે ॥ ૪૪૦॥

સાભાસં વ્યષ્ટ્યુપહિતં તત્તાદાત્મ્યમુપાગતમ્ ।
ચૈતન્યં વિશ્વ ઇત્યાહુર્વેદાન્તનયકોવિદાઃ ॥ ૪૪૧॥

વિશ્વસ્મિન્સ્થૂલદેહેઽત્ર સ્વાભિમાનેન તિષ્ઠતિ ।
યતસ્તતો વિશ્વ ઇતિ નામ્ના સાર્થો ભવત્યયમ્ ॥ ૪૪૨॥

વ્યષ્ટિરેષાસ્ય વિશ્વસ્ય ભવતિ સ્થૂલવિગ્રહઃ ।
ઉચ્યતેઽન્નવિકારિત્વાત્કોશોઽન્નમય ઇત્યયમ્ ॥ ૪૪૩॥

દેહોઽયં પિતૃભુક્તાન્નવિકારાચ્છુક્લ શોણિતાત્ ।
જાતઃ પ્રવર્ધતેઽન્નેન તદભાવે વિનશ્યતિ ॥ ૪૪૪॥

તસ્માદન્નવિકારિત્વેનાયમન્નમયો મતઃ ।
આચ્છાદકત્વાદેતસ્યાપ્યસેઃ કોશવદાત્મનઃ ॥ ૪૪૫॥

આત્મનઃ સ્થૂલભોગાનામેતદાયતનં વિદુઃ ।

શબ્દાદિવિષયાન્ભુઙ્ક્તે સ્થૂલાન્સ્થૂલાત્મનિ સ્થિતઃ ॥ ૪૪૬॥

બહિરાત્મા તતઃ સ્થૂલભોગાયતનમુચ્યતે ।
ઇન્દ્રિયૈરુપનીતાનાં શબ્દાદીનામયં સ્વયમ્ ।
દેહેન્દ્રિયમનોયુક્તો ભોક્તેત્યાહુર્મનીષિણઃ ॥ ૪૪૭॥

એકાદશદ્વારવતીહ દેહે
સૌધે મહારાજ ઇવાક્ષવર્ગૈઃ ।
સંસેવ્યમાનો વિષયોપભોગા-
નુપાધિસંસ્થો બુભુજેઽયમાત્મા ॥ ૪૪૮॥

જ્ઞાનેન્દ્રિયાણિ નિજદૈવતચોદિતાનિ
કર્મેન્દ્રિયાણ્યપિ તથા મન આદિકાનિ ।
સ્વસ્વપ્રયોજનવિધૌ નિયતાનિ સન્તિ
યત્નેન કિઙ્કરજના ઇવ તં ભજન્તે ॥ ૪૪૯॥

યત્રોપભુઙ્ક્તે વિષયાન્સ્થૂલાનેષ મહામતિઃ ।
અહં મમેતિ સૈષાસ્યાવસ્થા જાગ્રદિતીર્યતે ॥ ૪૫૦॥

એતત્સમષ્ટિવ્યષ્ટ્યોશ્ચોભયોરપ્યભિમાનિનોઃ ।
તદ્વિશ્વવૈશ્વાનરયોરભેદઃ પૂર્વવન્મતઃ ॥ ૪૫૧॥

સ્થૂલસૂક્ષ્મકારણાખ્યાઃ પ્રપઞ્ચા યે નિરૂપિતાઃ ।
તે સર્વેઽપિ મિલિત્વૈકઃ પ્રપઞ્ચોઽપિ મહાન્ભવેત્ ॥ ૪૫૨॥

મહાપ્રપઞ્ચાવચ્છિન્નં વિશ્વપ્રાજ્ઞાદિલક્ષણમ્ ।
વિરાડાદીશપર્યન્તં ચૈતન્યં ચૈકમેવ તત્ ॥ ૪૫૩॥

યદનાદ્યન્તમવ્યક્તં ચૈતન્યમજમક્ષરમ્ ।
મહાપ્રપઞ્ચેન સહાવિવિક્તં સદયોઽગ્નિવત્ ॥ ૪૫૪॥

તત્સર્વં ખલ્વિદં બ્રહ્મેત્યસ્ય વાક્યસ્ય પણ્ડિતૈઃ ।
વાચ્યાર્થ ઇતિ નિર્ણીતં વિવિક્તં લક્ષ્ય ઇત્યપિ ॥ ૪૫૫॥

સ્થૂલાદ્યજ્ઞાનપર્યન્તં કાર્યકારણલક્ષણમ્ ।
દૃશ્યં સર્વમનાત્મેતિ વિજાનીહિ વિચક્ષણ ॥ ૪૫૬॥

## verses 457-509 The nature of the Atman described

॥ ૨૭ ॥ આત્મન્ ॥

અન્તઃકરણતદ્વૃત્તિદ્રષ્ટૃ નિત્યમવિક્રિયમ્ ।
ચૈતન્યં યત્તદાત્મેતિ બુદ્ધ્યા બુધ્યસ્વ સૂક્ષ્મયા ॥ ૪૫૭॥

એષ પ્રત્યક્સ્વપ્રકાશો નિરંશોઽ-
સઙ્ગઃ શુદ્ધઃ સર્વદૈકસ્વભાવઃ ।
નિત્યાખણ્ડાનન્દરૂપો નિરીહઃ
સાક્ષી ચેતા કેવલો નિર્ગુણશ્ચ ॥ ૪૫૮॥

નૈવ પ્રત્યગ્જાયતે વર્ધતે નો
કિઞ્ચિન્નાપક્ષીયતે નૈવ નાશમ્ ।
આત્મા નિત્યઃ શાશ્વતોઽયં પુરાણો
નાસૌ હન્યો હન્યમાને શરીરે ॥ ૪૫૯॥

જન્માસ્તિત્વવિવૃદ્ધયઃ પરિણતિશ્ચાપક્ષતિર્નાશનં
દૃશ્યસ્યૈવ ભવન્તિ ષડ્વિકૃતયો નાનાવિધા વ્યાધયઃ ।
સ્થૂલત્વાદિ ચ નીલતાદ્યપિ મિતિર્વર્ણાશ્રમાદિપ્રથા
દૃશ્યન્તે વપુષો ન ચાત્મન ઇમે તદ્વિક્રિયાસાક્ષિણઃ ॥ ૪૬૦॥

અસ્મિન્નાત્મન્યનાત્મત્વમનાત્મન્યાત્મતાં પુનઃ ।
વિપરીતતયાધ્યસ્ય સંસરન્તિ વિમોહતઃ ॥ ૪૬૧॥

ભ્રાન્ત્યા મનુષ્યોઽહમહં દ્વિજોઽહં
તજ્જ્ઞોઽહમજ્ઞોઽહમતીવ પાપી ।
ભ્રષ્ટોઽસ્મિ શિષ્ટોઽસ્મિ સુખી ચ દુઃખી-
ત્યેવં વિમુહ્યાત્મનિ કલ્પયન્તિ ॥ ૪૬૨॥

અનાત્મનો જન્મજરામૃતિક્ષુધા-
તૃષ્ણાસુખક્લેશભયાદિધર્માન્ ।
વિપર્યયેણ હ્યતથાવિધેઽસ્મિ-
ન્નારોપયન્ત્યાત્મનિ બુદ્ધિદોષાત્ ॥ ૪૬૩॥

ભ્રાન્ત્યા યત્ર યદધ્યાસસ્તત્કૃતેન ગુણેન વા ।
દોષેણાપ્યણુમાત્રેણ સ ન સમ્બધ્યતે ક્વચિત્ ॥ ૪૬૪॥

કિં મરુર્મૃગતૃષ્ણામ્બુપૂરેણાર્દ્રત્વમૃચ્છતિ ।

દૃષ્ટિસંસ્થિતપીતેન શઙ્ખઃ પીતાયતે કિમુ ॥ ૪૬૫॥

વાતકલ્પિતનૈલ્યેન વ્યોમ કિં મલિનાયતે ।
શિષ્યઃ —
પ્રત્યગાત્મન્યવિષયેऽનાત્માધ્યાસઃ કથં પ્રભો ॥ ૪૬૬॥

પુરો દૃષ્ટે હિ વિષયેऽધ્યસ્યન્તિ વિષયાન્તરમ્ ।
તદ્દૃષ્ટં શુક્તિરજ્જ્વાદૌ સાદૃશ્યાદ્યનુબન્ધતઃ ॥ ૪૬૭॥

પરત્ર પૂર્વદૃષ્ટસ્યાવભાસઃ સ્મૃતિલક્ષણઃ ।
અધ્યાસઃ સ કથં સ્વામિન્ ભવેદાત્મન્યગોચરે ॥ ૪૬૮॥

નાનુભૂતઃ કદાપ્યાત્માનનુભૂતસ્ય વસ્તુનઃ ।
સાદૃશ્યં સિધ્યતિ કથમનાત્મનિ વિલક્ષણે ॥ ૪૬૯॥

અનાત્મન્યાત્મતાધ્યાસઃ કથમેષ સમાગતઃ ।
નિવૃત્તિઃ કથમેતસ્ય કેનોપાયેન સિધ્યતિ ॥ ૪૭૦॥

ઉપાધિયોગ ઉભયોઃ સમ એવેશજીવયોઃ ।
જીવસ્યૈવ કથં બન્ધો નેશ્વરસ્યાસ્તિ તત્કથમ્ ॥ ૪૭૧॥

એતત્સર્વં દયાદૃષ્ટ્યા કરામલકવત્સ્ફુટમ્ ।
પ્રતિપાદય સર્વજ્ઞ શ્રીગુરો કરુણાનિધે ॥ ૪૭૨॥

શ્રીગુરુઃ —
ન તાવદયમેકાન્તેનાત્માऽવિષય ઇષ્યતે ।
અસ્યાસ્મત્પ્રત્યયાર્થત્વાદપરોક્ષાચ્ચ સર્વશઃ ॥ ૪૭૩॥

પ્રસિદ્ધિરાત્મનોऽસ્ત્યેવ ન કસ્યાપિ ન દૃશ્યતે ।
પ્રત્યયો નાહમસ્મીતિ ન હ્યસ્તિ પ્રત્યગાત્મનિ ॥ ૪૭૪॥

ન કસ્યાપિ સ્વસદ્ભાવે પ્રમાણમભિકાઙ્ક્ષ્યતે ।
પ્રમાણાનાં ચ પ્રામાણ્યં યન્મૂલં કિંનુ બોધયેત્ ॥ ૪૭૫॥

માયાકાર્યૈસ્તિરોભૂતો નૈષ આત્માનુભૂયતે ।
મેઘવૃન્દૈર્યથા ભાનુસ્તથાયમહમાદિભિઃ ॥ ૪૭૬॥

પુરસ્થ એવ વિષયે વસ્તુન્યધ્યસ્યતામિતિ ।
નિયમો ન કૃતઃ સદ્ભિર્ભ્રાન્તિરેવાત્ર કારણમ્ ॥ ૪૭૭॥

દૃગાદ્યવિષયે વ્યોમ્નિ નીલતાદિ યથાબુધાઃ ।

અધ્યસ્યન્તિ તથૈવાસ્મિન્નાત્મન્યપિ મતિભ્રમાત્ ॥ ૪૭૮॥

અનાત્મન્યાત્મતાધ્યાસે ન સાદૃશ્યમપેક્ષ્યતે ।
પીતોઽયં શઙ્ખ ઇત્યાદૌ સાદૃશ્યં કિમપેક્ષિતમ્ ॥ ૪૭૯॥

નિરુપાધિભ્રમેષ્વસ્ય નૈવાપેક્ષા પ્રદૃશ્યતે । ષ્વસ્મિન્નૈવા
સોપાધિષ્વેવ તદ્દૃષ્ટં રજ્જુસર્પભ્રમાદિષુ ॥ ૪૮૦॥

તથાપિ કિઞ્ચિદ્વક્ષ્યામિ સાદૃશ્યં શ઼ૃણુ તત્પરઃ ।
અત્યન્તનિર્મલઃ સૂક્ષ્મ આત્માયમતિભાસ્વરઃ ॥ ૪૮૧॥

બુદ્ધિસ્તથૈવ સત્ત્વાત્મા સાભાસા ભાસ્વરામલા ।
સાંનિધ્યાદાત્મવદ્ભાતિ સૂર્યવત્સ્ફટિકો યથા ॥ ૪૮૨॥

આત્માભાસં તતો બુદ્ધિર્બુદ્ધ્યાભાસં તતો મનઃ ।
અક્ષાણિ મન આભાસાન્યક્ષાભાસમિદં વપુઃ ।
અત એવાત્મતાબુદ્ધિર્દેહાક્ષાદાવનાત્મનિ ॥ ૪૮૩॥

મૂઢાનાં પ્રતિબિમ્બાદૌ બાલાનામિવ દૃશ્યતે ।
સાદૃશ્યં વિદ્યતે બુદ્ધાવાત્મનોઽધ્યાસકારણમ્ ॥ ૪૮૪॥

અનાત્મન્યહમિત્યેવ યોઽયમધ્યાસ ઈરિતઃ ।
સ્યાદુત્તરોત્તરાધ્યાસે પૂર્વપૂર્વસ્તુ કારણમ્ ॥ ૪૮૫॥

સુપ્તિમૂર્છોત્થિતેષ્વેવ દૃષ્ટઃ સંસારલક્ષણઃ ।
અનાદિરેષાવિદ્યા તત્સંસ્કારોઽપિ ચ તાદૃશઃ ॥ ૪૮૬॥

અધ્યાસબાધાગમનસ્ય કારણં
શ઼ૃણુ પ્રવક્ષ્યામિ સમાહિતાત્મા ।
યસ્માદિદં પ્રાપ્તમનર્થજાતં
જન્માપ્યયવ્યાધિજરાદિદુઃખમ્ ॥ ૪૮૭॥

આત્મોપાધેરવિદ્યાયા અસ્તિ શક્તિદ્વયં મહત્ ।
વિક્ષેપ આવૃતિશ્ચેતિ યાભ્યાં સંસાર આત્મનઃ ॥ ૪૮૮॥

આવૃતિસ્તમસઃ શક્તિસ્તદ્ધ્યાવરણકારણમ્ ।
મૂલાવિદ્યેતિ સા પ્રોક્તા યયા સમ્મોહિતં જગત્ ॥ ૪૮૯॥

વિવેકવાનપ્યતિયૌક્તિકોઽપિ
શ્રુતાત્મતત્ત્વોઽપિ ચ પણ્ડિતોઽપિ ।

શક્ત્યા યયા સંવૃતબોધદૃષ્ટિ-
રાત્માનમાત્મસ્થમિમં ન વેદ ॥ ૪૯૦॥

વિક્ષેપનામ્ની રજસસ્તુ શક્તિઃ
પ્રવૃત્તિહેતુઃ પુરુષસ્ય નિત્યમ્ ।
સ્થૂલાદિલિઙ્ગાન્તમશેષમેતદ્-
યયા સદાત્મન્યસદેવ સૂયતે ॥ ૪૯૧॥

નિદ્રા યથા પૂરુષમપ્રમત્તં
સમાવૃણોતીયમપિ પ્રતીચમ્ ।
તથા વૃણોત્યાવૃતિશક્તિરન્ત-
ર્વિક્ષેપશક્તિં પરિજૃમ્ભયન્તી ॥ ૪૯૨॥

શક્ત્યા મહત્યાવરણાભિધાનયા
સમાવૃતે સત્યમલસ્વરૂપે ।
પુમાનનાત્મન્યહમેષ એવે-
ત્યાત્મત્વબુદ્ધિં વિદધાતિ મોહાત્ ॥ ૪૯૩॥

યથા પ્રસુપ્તિપ્રતિભાસદેહે
સ્વાત્મત્વધીરેષ તથા હ્યનાત્મનઃ ।
જન્માપ્યયક્ષુદ્ભયતૃટ્છ્રમાદી-
નારોપયત્યાત્મનિ તસ્ય ધર્માન્ ॥ ૪૯૪॥

વિક્ષેપશક્ત્યા પરિચોદ્યમાનઃ
કરોતિ કર્માણ્યુભયાત્મકાનિ ।
ભુઞ્જાન એતત્ફલમપ્યુપાત્તં
પરિભ્રમત્યેષ ભવામ્બુરાશૌ ॥૪૯૫ ॥

અધ્યાસદોષાત્સમુપાગતોઽયં
સંસારબન્ધઃ પ્રબલઃ પ્રતીચઃ ।
યદ્યોગતઃ ક્લિશ્યતિ ગર્ભવાસ-
જન્માપ્યયક્લેશભયૈરજસ્રમ્ ॥ ૪૯૬॥

અધ્યાસો નામ ખલ્વેષ વસ્તુનો યોઽન્યથાગ્રહઃ ।
સ્વાભાવિકભ્રાન્તિમૂલં સંસૃતેરાદિકારણમ્ ॥ ૪૯૭॥

સર્વાનર્થસ્ય તદ્બીજં યોઽન્યથાગ્રહ આત્મનઃ ।

તતઃ સંસારસમ્પાતઃ સન્તતક્લેશલક્ષણઃ ॥ ૪૯૮॥

અધ્યાસાદેવ સંસારો નષ્ટેઽધ્યાસે ન દૃશ્યતે ।
તદેતદુભયં સ્પષ્ટં પશ્ય ત્વં બદ્ધમુક્તયોઃ ॥ ૪૯૯॥

બદ્ધં પ્રવૃત્તિતો વિદ્ધિ મુક્તં વિદ્ધિ નિવૃત્તિતઃ ।
પ્રવૃત્તિરેવ સંસારો નિવૃત્તિર્મુક્તિરિષ્યતે ॥ ૫૦૦॥

આત્મનઃ સોઽયમધ્યાસો મિથ્યાજ્ઞાનપુરઃસરઃ ।
અસત્કલ્પોઽપિ સંસારં તનુતે રજ્જુસર્પવત્ ॥ ૫૦૧॥

ઉપાધિયોગસામ્યેઽપિ જીવવત્પરમાત્મનઃ ।
ઉપાધિભેદાન્નો બન્ધસ્તત્કાર્યમપિ કિઞ્ચન ॥ ૫૦૨॥

અસ્યોપાધિઃ શુદ્ધસત્ત્વપ્રધાના
    માયા યત્ર ત્વસ્ય નાસ્ત્યલ્પભાવઃ ।
સત્ત્વસ્યૈવોત્કૃષ્ટતા તેન બન્ધો
    નો વિક્ષેપસ્તત્કૃતો લેશમાત્રઃ ॥ ૫૦૩॥

સર્વજ્ઞોઽપ્રતિબદ્ધબોધવિભવસ્તેનૈવ દેવઃ સ્વયં
    માયાં સ્વામવલમ્બ્ય નિશ્ચલતયા સ્વચ્છન્દવૃત્તિઃ પ્રભુઃ ।
સૃષ્ટિસ્થિત્યદનપ્રવેશયમનવ્યાપારમાત્રેચ્છયા
    કુર્વન્ક્રીડતિ તદ્રજસ્તમ ઉભે સંસ્તભ્ય શક્ત્યા સ્વયા ॥ ૫૦૪॥

તસ્માદાવૃતિવિક્ષેપૌ કિઞ્ચિત્કર્તું ન શક્નુતઃ ।
સ્વયમેવ સ્વતન્ત્રોઽસૌ તત્પ્રવૃત્તિનિરોધયોઃ ॥ ૫૦૫॥

તમેવ સાધુકર્મેતિ શ્રુતિર્વક્તિ મહેશિતુઃ ।
નિગ્રહેઽનુગ્રહે શક્તિરાવૃતિક્ષેપયોર્યતઃ ॥ ૫૦૬॥

રજસસ્તમસશ્ચૈવ પ્રાબલ્યં સત્ત્વહાનતઃ ।
જીવોપાધૌ તથા જીવે તત્કાર્યં બલવત્તરમ્ ॥ ૫૦૭॥

તેન બન્ધોઽસ્ય જીવસ્ય સંસારોઽપિ ચ તત્કૃતઃ ।
સમ્પ્રાપ્તઃ સર્વદા યત્ર દુઃખં ભૂયઃ સ ઈક્ષતે ॥ ૫૦૮॥

એતસ્ય સંસૃતેર્હેતુરધ્યાસોઽર્થવિપર્યયઃ ।
અધ્યાસમૂલમજ્ઞાનમાહુરાવૃતિલક્ષણમ્ ॥૫૦૯ ॥

## verses 510-519 Knowledge destroys Ignorance, not Action

॥ ૨૮ ॥ અજ્ઞાનનિવૃત્તિઃ ॥

અજ્ઞાનસ્ય નિવૃત્તિસ્તુ જ્ઞાનેનૈવ ન કર્મણા ।
અવિરોધિતયા કર્મ નૈવાજ્ઞાનસ્ય બાધકમ્ ॥ ૫૧૦॥

કર્મણા જાયતે જન્તુઃ કર્મણૈવ પ્રલીયતે ।
કર્મણઃ કાર્યમેવૈષા જન્મમૃત્યુપરમ્પરા ॥ ૫૧૧॥

નૈતસ્માત્કર્મણઃ કાર્યમન્યદસ્તિ વિલક્ષણમ્ ।
અજ્ઞાનકાર્યં તત્કર્મ યતોઽજ્ઞાનેન વર્ધતે ॥ ૫૧૨॥

યદ્યેન વર્ધતે તેન નાશસ્તસ્ય ન સિધ્યતિ ।
યેન યસ્ય સહાવસ્થા નિરોધાય ન કલ્પતે ॥ ૫૧૩॥

નાશકત્વં તદુભયોઃ કો નુ કલ્પયિતું ક્ષમઃ ।
સર્વં કર્માવિરોધ્યેવ યતોઽજ્ઞાનસ્ય સર્વદા ॥ ૫૧૪॥

તતોઽજ્ઞાનસ્ય વિચ્છિત્તિઃ કર્મણા નૈવ સિધ્યતિ ।
યસ્ય પ્રધ્વંસજનકો યત્સંયોગોઽસ્તિ તત્ક્ષણે ॥ ૫૧૫॥

તયોરેવ વિરોધિત્વં યુક્તં ભિન્નસ્વભાવયોઃ ।
તમઃપ્રકાશયોર્યદ્વત્પરસ્પરવિરોધિતા ॥ ૫૧૬॥

અજ્ઞાનજ્ઞાનયોસ્તદ્વદુભયોરેવ દૃશ્યતે ।
ન જ્ઞાનેન વિનાઽજ્ઞાનનાશઃ કેનાપિ સિધ્યતિ ॥ ૫૧૭॥

તસ્માદજ્ઞાનવિચ્છિત્ત્યૈ જ્ઞાનં સમ્પાદયેત્સુધીઃ ।
આત્માનાત્મવિવેકેન જ્ઞાનં સિધ્યતિ નાન્યથા ॥ ૫૧૮॥

યુક્ત્યાત્માનાત્મનોસ્તસ્માત્કરણીયં વિવેચનમ્ ।
અનાત્મન્યાત્મતાબુદ્ધિગ્રન્થિર્યેન વિદીર્યતે ॥ ૫૧૯॥

## verses 520-611 Refutation of the false doctrines

॥ ૨૯ ॥ કુમત ખણ્ડનમ્ ॥ ૫૨૦-૬૧૧

આત્માનાત્મવિવેકાર્થં વિવાદોઽયં નિરૂપ્યતે ।
યેનાત્માનાત્મનોસ્તત્ત્વં વિવિક્તં પ્રસ્ફુટાયતે ॥ ૫૨૦॥

મૂઢા અશ્રુતવેદાન્તાઃ સ્વયં પણ્ડિતમાનિનઃ ।
ઈશપ્રસાદરહિતાઃ સદ્ગુરોશ્ચ બહિર્મુખાઃ ॥ ૫૨૧॥

વિવદન્તિ પ્રકારં તં શ‍ૃણુ વક્ષ્યામિ સાદરમ્ ।
અત્યન્તપામરઃ કશ્ચિત્પુત્ર આત્મેતિ મન્યતે ॥ ૫૨૨॥

આત્મનીવ સ્વપુત્રેઽપિ પ્રબલપ્રીતિદર્શનાત્ ।
પુત્રે તુ પુષ્ટે પુષ્ટોઽહં નષ્ટે નષ્ટોઽહમિત્યતઃ ॥ ૫૨૩॥

અનુભૂતિબલાચ્ચાપિ યુક્તિતોઽપિ શ્રુતેરપિ ।
આત્મા વૈ પુત્રનામાસીત્યેવં ચ વદતિ શ્રુતિઃ ॥ ૫૨૪॥

દીપાદ્દીપો યથા તદ્વત્પિતુઃ પુત્રઃ પ્રજાયતે ।
પિતુર્ગુણાનાં તનયે બીજાઙ્કુરવદીક્ષણાત્ ॥ ૫૨૫॥

અતોઽયં પુત્ર આત્મેતિ મન્યતે ભ્રાન્તિમત્તમઃ ।
તન્મતં દૂષયત્યન્યઃ પુત્ર આત્મા કથં ત્વિતિ ॥ ૫૨૬॥

પ્રીતિમાત્રાત્કથં પુત્ર આત્મા ભવિતુમર્હતિ ।
અન્યત્રાપીક્ષ્યતે પ્રીતિઃ ક્ષેત્રપાત્રધનાદિષુ ॥ ૫૨૭॥

પુત્રાદ્વિશિષ્ટા દેહેઽસ્મિન્પ્રાણિનાં પ્રીતિરિષ્યતે ।
પ્રદીપ્તે ભવને પુત્રં ત્યક્ત્વા જન્તુઃ પલાયતે ॥ ૫૨૮॥

તં વિક્રીણાતિ દેહાર્થં પ્રતિકૂલં નિહન્તિ ચ ।
તસ્માદાત્મા તુ તનયો ન ભવેચ્ચ કદાચન ॥ ૫૨૯॥

ગુણરૂપાદિસાદૃશ્યં દીપવન્ન સુતે પિતુઃ ।
અવ્યઙ્ગાજ્જાયતે વ્યઙ્ગઃ સુગુણાદપિ દુર્ગુણઃ ॥ ૫૩૦॥

આભાસમાત્રાસ્તાઃ સર્વા યુક્તયોઽપ્યુક્તયોઽપિ ચ ।
પુત્રસ્ય પિતૃવદ્ગેહે સર્વકાર્યેષુ વસ્તુષુ ॥ ૫૩૧॥

સ્વામિત્વદ્યોતનાયાસ્મિન્નાત્મત્વમુપચર્યતે ।
શ્રુત્યા તુ મુખ્યયા વૃત્ત્યા પુત્ર આત્મેતિ નોચ્યતે ॥ ૫૩૨॥

ઔપચારિકમાત્મત્વં પુત્રે તસ્માન્ન મુખ્યતઃ ।
અહમ્પદપ્રત્યયાર્થો દેહ એવ ન ચેતરઃ ॥ ૫૩૩॥

પ્રત્યક્ષઃ સર્વજન્તૂનાં દેહોઽહમિતિ નિશ્ચયઃ ।
એષ પુરુષોઽન્નરસમય ઇત્યપિ ચ શ્રુતિઃ ॥ ૫૩૪॥

પુરુષત્વં વદત્યસ્ય સ્વાત્મા હિ પુરુષસ્તતઃ ।
આત્માયં દેહ એવેતિ ચાર્વાકેણ વિનિશ્ચિતમ્ ॥ ૫૩૫॥

તન્મતં દૂષયત્યન્યોઽસહમાનઃ પૃથગ્જનઃ ।
દેહ આત્મા કથં નુ સ્યાત્પરતન્ત્રો હ્યચેતનઃ ॥ ૫૩૬॥

ઇન્દ્રિયૈશ્ચાલ્યમાનોઽયં ચેષ્ટતે ન સ્વતઃ ક્વચિત્ ।
આશ્રયશ્ચક્ષુરાદીનાં ગૃહવદ્ગૃહમેધિનામ્ ॥ ૫૩૭॥

બાલ્યાદિનાનાવસ્થાવાઞ્શુક્લશોણિતસમ્ભવઃ ।
અતઃ કદાપિ દેહસ્ય નાત્મત્વમુપપદ્યતે ॥ ૫૩૮॥

બધિરોઽહં ચ કાણોઽહં મૂક ઇત્યનુભૂતિતઃ ।
ઇન્દ્રિયાણિ ભવન્ત્યાત્મા યેષામસ્ત્યર્થવેદનમ્ ॥ ૫૩૯॥

ઇન્દ્રિયાણાં ચેતનત્વં દેહે પ્રાણાઃ પ્રજાપતિમ્ ।
એતમેત્યેત્યૂચુરિતિ શ્રુત્યૈવ પ્રતિપાદ્યતે ॥ ૫૪૦॥

યતસ્તસ્માદિન્દ્રિયાણાં યુક્તમાત્મત્વમિત્યમુમ્ ।
નિશ્ચયં દૂષયત્યન્યોઽસહમાનઃ પૃથગ્જનઃ ॥ ૫૪૧॥

ઇન્દ્રિયાણિ કથં ત્વાત્મા કરણાનિ કુઠારવત્ ।
કરણસ્ય કુઠારાદેશ્ચેતનત્વં ન હીક્ષ્યતે ॥ ૫૪૨॥

શ્રુત્યાધિદેવતામેવેન્દ્રિયેષૂપચર્યતે ।
ન તુ સાક્ષાદિન્દ્રિયાણાં ચેતનત્વમુદીર્યતે ॥ ૫૪૩॥

અચેતનસ્ય દીપાદેરર્થાભાસકતા યથા ।
તથૈવ ચક્ષુરાદીનાં જડાનામપિ સિધ્યતિ ॥ ૫૪૪॥

ઇન્દ્રિયાણાં ચેષ્ટયિતા પ્રાણોઽયં પઞ્ચવૃત્તિકઃ ।
સર્વાવસ્થાસ્વવસ્થાવાન્સોઽયમાત્મત્વમર્હતિ ।
અહં ક્ષુધાવાંસ્તૃષ્ણાવાનિત્યાદ્યનુભવાદપિ ॥ ૫૪૫॥

શ્રુત્યાન્યોઽન્તર આત્મા પ્રાણમય ઇતીર્યતે યસ્માત્ ।
તસ્માત્પ્રાણસ્યાત્મત્વં યુક્તં નો કરણસંજ્ઞાનાં ક્વાપિ ॥ ૫૪૬॥

ઇતિ નિશ્ચયમેતસ્ય દૂષયત્યપરો જડઃ ।
ભવત્યાત્મા કથં પ્રાણો વાયુરેવૈષ આન્તરઃ ॥ ૫૪૭॥

બહિર્યાત્યન્તરાયાતિ ભસ્ત્રિકાવાયુવન્મુહુઃ ।
ન હિતં વાऽહિતં વા સ્વમન્યદ્વા વેદ કિઞ્ચન ॥ ૫૪૮ ॥

જડસ્વભાવશ્ચપલઃ કર્મયુક્તશ્ચ સર્વદા ।
પ્રાણસ્ય ભાનં મનસિ સ્થિતે સુપ્તે ન દૃશ્યતે ॥ ૫૪૯॥

મનસ્તુ સર્વં જાનાતિ સર્વવેદનકારણમ્ ।
યત્તસ્માન્મન એવાત્મા પ્રાણસ્તુ ન કદાચન ॥ ૫૫૦॥

સઙ્કલ્પવાનહં ચિન્તાવાનહં ચ વિકલ્પવાન્ ।
ઇત્યાદ્યનુભવાદન્યોऽન્તર આત્મા મનોમયઃ ॥ ૫૫૧॥

ઇત્યાદિશ્રુતિસદ્ભાવાદ્યુક્તા મનસ આત્મતા ।
ઇતિ નિશ્ચયમેતસ્ય દૂષયત્યપરો જડઃ ॥ ૫૫૨॥

કથં મનસ આત્મત્વં કરણસ્ય દૃગાદિવત્ ।
કર્તૃપ્રયોજ્યં કરણં ન સ્વયં તુ પ્રવર્તતે ॥ ૫૫૩॥

કરણપ્રયોક્તા યઃ કર્તા તસ્યૈવાત્મત્વમર્હતિ ।
આત્મા સ્વતન્ત્રઃ પુરુષો ન પ્રયોજ્યઃ કદાચન ॥ ૫૫૪॥

અહં  કર્તાસ્મ્યહં ભોક્તા સુખીત્યનુભવાદપિ ।
બુદ્ધિરાત્મા ભવત્યેવ  બુદ્ધિધર્મો હ્યહઙ્કૃતિઃ ॥ ૫૫૫॥

અન્યોऽન્તર આત્મા વિજ્ઞાનમય ઇતિ વદતિ નિગમઃ ।
મનસોऽપિ ચ ભિન્નં વિજ્ઞાનમયં કર્તૃરૂપમાત્માનમ્ ॥ ૫૫૬॥

વિજ્ઞાનં યજ્ઞં તનુતે કર્માણિ તનુતેऽપિ ચ ।
ઇત્યસ્ય કર્તૃતા શ્રુત્યા મુખતઃ પ્રતિપાદ્યતે ।
તસ્માદ્યુક્તાત્મતા બુદ્ધેરિતિ બૌદ્ધેન નિશ્ચિતમ્ ॥ ૫૫૭॥

પ્રાભાકરતાર્કિકશ્ચ તાવુભાવપ્યમર્ષયા ।
તન્નિશ્ચયં દૂષયતો બુદ્ધિરાત્મા કથં ન્વિતિ ॥ ૫૫૮॥

બુદ્ધેરજ્ઞાનકાર્યત્વાદ્વિનાશિત્વાત્પ્રતિક્ષણમ્ ।
બુદ્ધ્યાદીનાં ચ સર્વેષામજ્ઞાને લયદર્શનાત્ ॥ ૫૫૯॥

અજ્ઞોऽહમિત્યનુભવાદાસ્ત્રીબાલાદિગોચરાત્ ।
ભવત્યજ્ઞાનમેવાત્મા ન તુ બુદ્ધિઃ કદાચન ॥ ૫૬૦॥

વિજ્ઞાનમયાદન્યં ત્વાનન્દમયં પરં તથાત્માનમ્ ।

અન્યોઽન્તર આત્માનન્દમય ઇતિ હિ વદતિ વેદોઽપિ ॥ ૫૬૧॥

દુઃખપ્રત્યયશૂન્યત્વાદાનન્દમયતા મતા ।
અજ્ઞાને સકલં સુપ્તૌ બુદ્ધ્યાદિ પ્રવિલીયતે ॥ ૫૬૨॥

દુઃખિનોઽપિ સુષુપ્ત્યાદાવાનન્દમયતા તતઃ ।
સુપ્તૌ કિઞ્ચિન્ન જાનામીત્યનુભૂતિશ્ચ દૃશ્યતે ॥ ૫૬૩॥

યત એવમતો યુક્તા હ્યજ્ઞાનસ્યાત્મતા ધ્રુવમ્ ।
ઇતિ તન્નિશ્ચયં ભાટ્ટા દૂષયન્તિ સ્વયુક્તિભિઃ ॥ ૫૬૪॥

કથમજ્ઞાનમેવાત્મા જ્ઞાનં ચાપ્યુપલભ્યતે ।
જ્ઞાનાભાવે કથં વિદ્યુરજ્ઞોઽહમિતિ ચાજ્ઞતામ્ ।
અસ્વાપ્સં સુખમેવાહં ન જાનામ્યત્ર કિઞ્ચન ॥ ૫૬૫॥

ઇત્યજ્ઞાનમપિ જ્ઞાનં પ્રબુદ્ધેષુ પ્રદૃશ્યતે ।
પ્રજ્ઞાનઘન એવાનન્દમય ઇત્યપિ શ્રુતિઃ ॥ ૫૬૬॥

પ્રબ્રવીત્યુભયાત્મત્વમાત્મનઃ સ્વયમેવ હિ ।
આત્માતશ્ચિજ્જડતનુઃ ખદ્યોત ઇવ સમ્મતઃ ॥ ૫૬૭॥

ન કેવલાજ્ઞાનમયો ઘટકુડ્યાદિવજ્જડઃ ।
ઇતિ નિશ્ચયમેતેષાં દૂષયત્યપરો જડઃ ॥ ૫૬૮॥

જ્ઞાનાજ્ઞાનમયસ્ત્વાત્મા કથં ભવિતુમર્હતિ ।
પરસ્પરવિરુદ્ધત્વાત્તેજસ્તિમિરવત્તયોઃ ॥ ૫૬૯॥

સામાનાધિકરણ્યં વા સંયોગો વા સમાશ્રયઃ ।
તમઃપ્રકાશવજ્જ્ઞાનાજ્ઞાનયોર્ન હિ સિધ્યતિ ॥ ૫૭૦॥

અજ્ઞાનમપિ વિજ્ઞાનં બુદ્ધિર્વાપિ ચ તદ્ગુણાઃ ।
સુષુપ્તૌ નોપલભ્યન્તે યત્કિઞ્ચિદપિ વાપરમ્ ॥ ૫૭૧॥

માત્રાદિલક્ષણં કિં તુ શૂન્યમેવોપલભ્યતે ।
સુષુપ્તૌ નાન્યદસ્ત્યેવ નાહમપ્યાસમિત્યનુ ॥ ૫૭૨॥

સુપ્તોત્થિતજનૈઃ સર્વૈઃ શૂન્યમેવાનુસ્મર્યતે ।
યત્તતઃ શૂન્યમેવાત્મા ન જ્ઞાનાજ્ઞાનલક્ષણઃ ॥ ૫૭૩॥

વેદેનાપ્યસદેવેદમગ્ર આસીદિતિ સ્ફુટમ્ ।
નિરુચ્યતે યતસ્તસ્માચ્છૂન્યસ્યૈવાત્મતા મતા ॥ ૫૭૪॥

અસન્નેવ ઘટઃ પૂર્વં જાયમાનઃ પ્રદૃશ્યતે ।
ન હિ કુમ્ભઃ પુરૈવાન્તઃ સ્થિત્વોદેતિ બહિર્મુખઃ ॥ ૫૭૫॥

યત્તસ્માદસતઃ સર્વં સદિદં સમજાયત ।
તતઃ સર્વાત્મના શૂન્યસ્યૈવાત્મત્વં સમર્હતિ ॥ ૫૭૬॥

ઇત્યેવં પણ્ડિતમ્મન્યૈઃ પરસ્પરવિરોધિભિઃ ।
તત્તન્મતાનુરૂપાલ્પશ્રુતિયુક્ત્યનુભૂતિભિઃ ॥ ૫૭૭॥

નિર્ણીતમતજાતાનિ ખણ્ડિતાન્યેવ પણ્ડિતૈઃ ।
શ્રુતિભિશ્ચાપ્યનુભવૈર્બાધકૈઃ પ્રતિવાદિનામ્ ॥ ૫૭૮॥

યતસ્તસ્માત્તુ પુત્રાદેઃ શૂન્યાન્તસ્ય વિશેષતઃ ।
સુસાધિતમનાત્મત્વં શ્રુતિયુક્ત્યનુભૂતિભિઃ ॥ ૫૭૯॥

ન હિ પ્રમાણાન્તરબાધિતસ્ય
યાથાર્થ્યમઙ્ગીક્રિયતે મહદ્ભિઃ ।
પુત્રાદિશૂન્યાન્તમનાત્મતત્ત્વ-
મિત્યેવ વિસ્પષ્ટમતઃ સુજાતમ્ ॥ ૫૮૦॥

શિષ્યઃ ।
સુષુપ્તિકાલે સકલે વિલીને
શૂન્યં વિના નાન્યદિહોપલભ્યતે ।
શૂન્યં ત્વનાત્મા ન તતઃ પરઃ
કોઽપ્યાત્માભિધાનસ્ત્વનુભૂયતેઽર્થઃ ॥ ૫૮૧॥

યદ્યસ્તિ ચાત્મા કિમુ નોપલભ્યતે
સુપ્તૌ યથા તિષ્ઠતિ કિં પ્રમાણમ્ ।
કિં લક્ષણોઽસૌ સ કથં ન બાધ્યતે
પ્રબાધ્યમાનેષ્વહમાદિષુ સ્વયમ્ ॥ ૫૮૨॥

એતત્સંશયજાતં મે હૃદયગ્રન્થિલક્ષણમ્ ।
છિન્ધિ યુક્તિમહાખડ્ગધારયા કૃપયા ગુરો ॥ ૫૮૩॥

શ્રીગુરુઃ ।
અતિસૂક્ષ્મતરઃ પ્રશ્નસ્તવાયં સદૃશો મતઃ ।
સૂક્ષ્માર્થદર્શનં સૂક્ષ્મબુદ્ધિષ્વેવ પ્રદૃશ્યતે ॥ ૫૮૪॥

શ‍ૃણુ વક્ષ્યામિ સકલં યદ્યત્પૃષ્ટં ત્વયાધુના ।
રહસ્યં પરમં સૂક્ષ્મં જ્ઞાતવ્યં ચ મુમુક્ષુભિઃ ॥ ૫૮૫॥

બુદ્ધ્યાદિ સકલં સુપ્તાવનુલીનં સ્વકારણે ।
અવ્યક્તે વટવદ્બીજે તિષ્ઠત્યવિકૃતાત્મના ॥ ૫૮૬॥

તિષ્ઠત્યેવ સ્વરૂપેણ ન તુ શૂન્યાયતે જગત્ ।
ક્વચિદઙ્કુરરૂપેણ ક્વચિદ્બીજાત્મના વટઃ ।
કાર્યકારણરૂપેણ યથા તિષ્ઠત્યદસ્તથા ॥ ૫૮૭॥

અવ્યાકૃતાત્મનાવસ્થાં જગતો વદતિ શ્રુતિઃ ।
સુષુપ્ત્યાદિષુ તદ્ભેદં તર્હ્યવ્યાકૃતમિત્યસૌ ॥ ૫૮૮॥

ઇમમર્થમવિજ્ઞાય નિર્ણીતં શ્રુતિયુક્તિભિઃ ।
જગતો દર્શનં શૂન્યમિતિ પ્રાહુરતદ્વિદઃ ॥ ૫૮૯॥

નાસતઃ સત ઉત્પત્તિઃ શ્રૂયતે ન ચ દૃશ્યતે ।
ઉદેતિ નરશ‍ૃઙ્ગાત્કિં ખપુષ્પાત્કિં ભવિષ્યતિ ॥ ૫૯૦॥

પ્રભવતિ ન હિ કુમ્ભોઽવિદ્યમાનો મૃદશ્ચેત્
પ્રભવતુ સિકતાયા વાથવા વારિણો વા ।
ન હિ ભવતિ ચ તાભ્યાં સર્વથા ક્વાપિ તસ્મા-
દ્યત ઉદયતિ યોઽર્થોઽસ્ત્યત્ર તસ્ય સ્વભાવઃ ॥ ૫૯૧॥

અન્યથા વિપરીતં સ્યાત્કાર્યકારણલક્ષણમ્ ।
નિયતં સર્વશાસ્ત્રેષુ સર્વલોકેષુ સર્વતઃ ॥ ૫૯૨॥

કથમસતઃ સજ્જાયેતેતિ શ્રુત્યા નિષિદ્ધ્યતે તસ્માત્ ।
અસતઃ સજ્જનનં નો ઘટતે મિથ્યૈવ શૂન્યશબ્દાર્થઃ ॥ ૫૯૩॥

અવ્યક્તશબ્દિતે પ્રાજ્ઞે સત્યાત્મન્યત્ર જાગ્રતિ ।
કથં સિધ્યતિ શૂન્યત્વં તસ્ય ભ્રાન્તશિરોમણે ॥ ૫૯૪॥

સુષુપ્તૌ શૂન્યમેવેતિ કેન પુંસા તવેરિતમ્ ।
હેતુનાનુમિતં કેન કથં જ્ઞાતં ત્વયોચ્યતામ્ ॥ ૫૯૫॥

ઇતિ પૃષ્ટો મૂઢતમો વદિષ્યતિ કિમુત્તરમ્ ।
નૈવાનુરૂપકં લિઙ્ગં વક્તા વા નાસ્તિ કશ્ચન ।
સુષુપ્તિસ્થિતશૂન્યસ્ય બોદ્ધા કો ન્વાત્મનઃ પરઃ ॥ ૫૯૬॥

સ્વેનાનુભૂતં સ્વયમેવ વક્તિ
 સ્વસુપ્તિકાલે સ્થિતશૂન્યભાવમ્ ।
તત્ર સ્વસત્તામનવેક્ષ્ય મૂઢઃ
 સ્વસ્યાપિ શૂન્યત્વમયં બ્રવીતિ ॥ ૫૯૭॥

અવેદ્યમાનઃ સ્વયમન્યલોકૈઃ
 સૌષુપ્તિકં ધર્મમવૈતિ સાક્ષાત્ ।
બુદ્ધ્યાદ્યભાવસ્ય ચ યોઽત્ર બોદ્ધા
 સ એવ આત્મા ખલુ નિર્વિકારઃ ॥ ૫૯૮॥

યસ્યેદં સકલં વિભાતિ મહસા તસ્ય સ્વયંજ્યોતિષઃ
 સૂર્યસ્યેવ કિમસ્તિ ભાસકમિહ પ્રજ્ઞાદિ સર્વં જડમ્ ।
ન હ્યર્કસ્ય વિભાસકં ક્ષિતિતલે દૃષ્ટં તથૈવાત્મનો
 નાન્યઃ કોઽપ્યનુભાસકોઽનુભવિતા નાતઃ પરઃ કશ્ચન ॥ ૫૯૯॥

યેનાનુભૂયતે સર્વં જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
વિજ્ઞાતારમિમં કો નુ કથં વેદિતુમર્હતિ ॥ ૬૦૦॥

સર્વસ્ય દાહકો વહ્નિર્વહ્નેર્નાન્યોઽસ્તિ દાહકઃ ।
યથા તથાત્મનો જ્ઞાતુર્જ્ઞાતા કોઽપિ ન દૃશ્યતે ॥ ૬૦૧॥

ઉપલભ્યેત કેનાયં હ્યુપલબ્ધા સ્વયં તતઃ ।
ઉપલબ્ધ્યન્તરાભાવાન્નાયમાત્મોપલભ્યતે ॥ ૬૦૨॥

બુદ્ધ્યાદિવેદ્યવિલયાદયમેક એવ
 સુપ્તૌ ન પશ્યતિ શ‌ૃણોતિ ન વેત્તિ કિઞ્ચિત્ ।
સૌષુપ્તિકસ્ય તમસઃ સ્વયમેવ સાક્ષી
 ભૂત્વાત્ર તિષ્ઠતિ સુખેન ચ નિર્વિકલ્પઃ ॥ ૬૦૩॥

સુષુપ્તાવાત્મસદ્ભાવે પ્રમાણં પણ્ડિતોત્તમાઃ ।
વિદુઃ સ્વપ્રત્યભિજ્ઞાનમાબાલવૃદ્ધસમ્મતમ્ ॥ ૬૦૪॥

પ્રત્યભિજ્ઞાયમાનત્વં લિઙ્ગમત્રાનુમાપકમ્ ।
સ્મર્યમાણસ્ય સદ્ભાવઃ સુખમસ્વાપ્સમિત્યયમ્ ॥ ૬૦૫॥

પુરાનુભૂતો નો ચેત્તુ સ્મૃતેરનુદયો ભવેત્ ।
ઇત્યાદિતર્કયુક્તિશ્ચ સદ્ભાવે માનમાત્મનઃ ॥ ૬૦૬॥

યત્રાત્મનોઽકામયિતૃત્વબુદ્ધિઃ

સ્વપ્નાનવેક્ષાપિ ચ તત્સુષુપ્તમ્ ।
ઇત્યાત્મ સદ્ભાવ ઉદીર્યતેઽત્ર
શ્રુત્યાપિ તસ્માચ્છ્રુતિરત્ર માનમ્ ॥ ૬૦૭॥

અકામયિતૃતા સ્વપ્નાદર્શનં ઘટતે કથમ્ ।
અવિદ્યમાનસ્ય તત આત્માસ્તિત્વં પ્રતીયતે ॥ ૬૦૮॥

એતૈઃ પ્રમાણૈરસ્તીતિ જ્ઞાતઃ સાક્ષિતયા બુધૈઃ ।
આત્માયં કેવલઃ શુદ્ધઃ સચ્ચિદાનન્દલક્ષણઃ ॥ ૬૦૯॥

સત્ત્વચિત્ત્વાનન્દતાદિલક્ષણં પ્રત્યગાત્મનઃ ।
કાલત્રયેઽપ્ય બાધ્યત્વં સત્ત્વં નિત્યસ્વરૂપતઃ ॥ ૬૧૦॥

શુદ્ધચૈતન્યરૂપત્વં ચિત્ત્વં જ્ઞાનસ્વરૂપતઃ ।
અખણ્ડસુખરૂપત્વાદાનન્દત્વમિતીર્યતે ॥ ૬૧૧॥

## verses 612-617 The eternal nature of the Atman

॥ ૩૦ ॥ શાશ્વતલક્ષણમ્ ॥

અનુસ્યૂતાત્મનઃ સત્તા જાગ્રત્સ્વપ્નસુષુપ્તિષુ ।
અહમસ્મીત્યતો નિત્યો ભવત્યાત્માયમવ્યયઃ ॥ ૬૧૨॥

સર્વદાપ્યાસમિત્યેવાભિન્નપ્રત્યય ઈક્ષ્યતે ।
કદાપિ નાસં નેત્યસ્માદાત્મનો નિત્યતા મતા ॥ ૬૧૩॥

આયાતાસુ ગતાસુ શૈશવમુખાવસ્થાસુ જાગ્રન્મુખા-
સ્વન્યાસ્વપ્યખિલાસુ વૃત્તિષુ ધિયો દુષ્ટાસ્વદુષ્ટાસ્વપિ ।
ગઙ્ગાભઙ્ગપરમ્પરાસુ જલવત્સત્તાનુવૃત્તાત્મન-
સ્તિષ્ઠત્યેવ સદા સ્થિરાહમહમિત્યેકાત્મતા સાક્ષિણઃ ॥ ૬૧૪॥

પ્રતિપદમહમાદયો વિભિન્નાઃ
ક્ષણપરિણામિતયા વિકારિણસ્તે ।
ન પરિણતિરમુષ્ય નિષ્કલત્વા-
દયમવિકાર્યત એવ નિત્ય આત્મા ॥ ૬૧૫॥

યઃ સ્વપ્નમદ્રાક્ષમહં સુખં યોઽ-
સ્વાપ્સં સ એવાસ્મ્યથ જાગરૂકઃ ।

ઇત્યેવમચ્છિન્નતયાનુભૂયતે
સત્તાત્મનો નાસ્તિ હિ સંશયોઽત્ર ॥ ૬૧૬॥

શ્રુત્યુક્તાઃ ષોડશકલાશ્ચિદાભાસસ્ય નાત્મનઃ ।
નિષ્કલત્વાન્નાસ્ય લયસ્તસ્માન્નિત્યત્વમાત્મનઃ ॥ ૬૧૭॥

## verses 618-622 The intelligent nature of the Atman

॥ ૩૧ ॥ ચિત્સ્વરૂપમ્ ॥

જડપ્રકાશકઃ સૂર્યઃ પ્રકાશાત્મૈવ નો જડઃ ।
બુદ્ધ્યાદિભાસકસ્તસ્માચ્ચિત્સ્વરૂપસ્તથા મતઃ ॥ ૬૧૮॥

કુડ્યાદેસ્તુ જડસ્ય નૈવ ઘટતે ભાનં સ્વતઃ સર્વદા
સૂર્યાદિપ્રભયા વિના ક્વચિદપિ પ્રત્યક્ષમેતત્તથા ।
બુદ્ધ્યાદેરપિ ન સ્વતોઽસ્ત્યણુરપિ સ્ફૂર્તિર્વિનૈવાત્મના
સોઽયં કેવલચિન્મયશ્શ્રુતિમતો ભાનુર્યથા રુઙ્મયઃ ॥ ૬૧૯॥

સ્વભાસને વાન્યપદાર્થભાસને
નાર્કઃ પ્રકાશાન્તરમીષદિચ્છતિ ।
સ્વબોધને વાપ્યહમાદિબોધને
તથૈવ ચિદ્ધાતુરયં પરાત્મા ॥ ૬૨૦॥

અન્યપ્રકાશં ન કિમપ્યપેક્ષ્ય
યતોઽયમાભાતિ નિજાત્મનૈવ ।
તતઃ સ્વયંજ્યોતિરયં ચિદાત્મા
ન હ્યાત્મભાને પરદીપ્ત્યપેક્ષા ॥ ૬૨૧॥

યં ન પ્રકાશયતિ કિઞ્ચિદિનોઽપિ ચન્દ્રઃ
નો વિદ્યુતઃ કિમુત વહ્નિરયં મિતાભઃ ।
યં ભાન્તમેતમનુભાતિ જગત્સમસ્તં
સોઽયં સ્વયં સ્ફુરતિ સર્વદશાસુ ચાત્મા ॥ ૬૨૨॥

## verses 623-634 The blissful nature of the Atman

॥ ૩૨ ॥ આનન્દસ્વરૂપમ્ ॥

આત્મનઃ સુખસ્વરૂપાદાનન્દત્વં સ્વલક્ષણમ્ ।
પરપ્રેમાસ્પદત્વેન સુખરૂપત્વમાત્મનઃ ॥ ૬૨૩ ॥

સુખહેતુષુ સર્વેષાં પ્રીતિઃ સાવધિરીક્ષ્યતે ।
કદાપિ નાવધિઃ પ્રીતેઃ સ્વાત્મનિ પ્રાણિનાં ક્વચિત્ ॥ ૬૨૪ ॥

ક્ષીણેન્દ્રિયસ્ય જીર્ણસ્ય સમ્પ્રાપ્તોત્ક્રમણસ્ય વા ।
અસ્તિ જીવિતુમેવાશા સ્વાત્મા પ્રિયતમો યતઃ ॥ ૬૨૫ ॥

આત્માતઃ પરમપ્રેમાસ્પદઃ સર્વશરીરિણામ્ ।
યસ્ય શેષતયા સર્વમુપાદેયત્વમૃચ્છતિ ॥ ૬૨૬ ॥

એષ એવ પ્રિયતમઃ પુત્રાદપિ ધનાદપિ ।
અન્યસ્માદપિ સર્વસ્માદાત્માયં પરમાન્તરઃ ॥ ૬૨૭ ॥

પ્રિયત્વેન મતં યત્તુ તત્સદા ન પ્રિયં નૃણામ્ ।
વિપત્તાવપિ સમ્પત્તૌ યથાત્મા ન તથાપરઃ ॥ ૬૨૮ ॥

આત્મા ખલુ પ્રિયતમોઽસુભૃતાં યદર્થા
ભાર્યાત્મજાપ્તગૃહવિત્તમુખાઃ પદાર્થાઃ ।
વાણિજ્યકર્ષણ ગવાવનરાજસેવા-
ભૈષજ્યકપ્રભૃતયો વિવિધાઃ ક્રિયાશ્ચ ॥ ૬૨૯ ॥

પ્રવૃત્તિશ્ચ નિવૃત્તિશ્ચ યચ્ચ યાવચ્ચ ચેષ્ટિતમ્ ।
આત્માર્થમેવ નાન્યાર્થં નાતઃ પ્રિયતમઃ પરઃ ॥ ૬૩૦ ॥

તસ્માદાત્મા કેવલાનન્દરૂપો
યઃ સર્વસ્માદ્વસ્તુનઃ પ્રેષ્ઠ ઉક્તઃ ।
યો વા અસ્માન્મન્યતેઽન્યં પ્રિયં યં
સોઽયં તસ્માચ્છોકમેવાનુભુઙ્ક્તે ॥ ૬૩૧ ॥

શિષ્યઃ ।
અપરઃ ક્રિયતે પ્રશ્નો મયાયં ક્ષમ્યતાં પ્રભો ।
અજ્ઞવાગપરાધાય કલ્પતે ન મહાત્મનામ્ ॥ ૬૩૨ ॥

આત્માન્યઃ સુખમન્યચ્ચ નાત્મનઃ સુખરૂપતા ।
આત્મનઃ સુખમાશાસ્યં યતતે સકલો જનઃ ॥ ૬૩૩ ॥

આત્મનઃ સુખરૂપત્વે પ્રયત્નઃ કિમુ દેહિનામ્ ।

એષ મે સંશયઃ સ્વામિન્ કૃપયૈવ નિરસ્યતામ્ ॥ ૬૩૪॥

verses 635-672 Atman the only way to happiness

॥ ૩૩ ॥ દુઃખપ્રદં વસ્તુ સુખં દાતું ન સમર્હતિ ॥ ૬૩૫-૬૭૨

શ્રીગુરુઃ ।
આનન્દરૂપમાત્માનમજ્ઞાત્વૈવ પૃથગ્જનઃ ।
બહિઃસુખાય યતતે ન તુ કશ્ચિદ્વિદન્બુધઃ ॥ ૬૩૫॥

અજ્ઞાત્વૈવ હિ નિક્ષેપં ભિક્ષામટતિ દુર્મતિઃ ।
સ્વવેશ્મનિ નિધિં જ્ઞાત્વા કો નુ ભિક્ષામટેત્સુધીઃ ॥ ૬૩૬॥

સ્થૂલં ચ સૂક્ષ્મં ચ વપુઃ સ્વભાવતો
દુઃખાત્મકં સ્વાત્મતયા ગૃહીત્વા ।
વિસ્મૃત્ય ચ સ્વં સુખરૂપમાત્મનો
દુઃખપ્રદેભ્યઃ સુખમજ્ઞ ઇચ્છતિ ॥ ૬૩૭॥

નહિ દુઃખપ્રદં વસ્તુ સુખં દાતું સમર્હતિ ।
કિં વિષં પિબતો જન્તોરમૃતત્વં પ્રયચ્છતિ ॥ ૬૩૮॥

આત્માન્યઃ સુખમન્યચ્ચેત્યેવં નિશ્ચિત્ય પામરઃ ।
બહિઃસુખાય યતતે સત્યમેવ ન સંશયઃ ॥ ૬૩૯॥

ઇષ્ટસ્ય વસ્તુનો ધ્યાનદર્શનાદ્યુપભુક્તિષુ ।
પ્રતીયતે ય આનન્દઃ સર્વેષામિહ દેહિનામ્ ॥ ૬૪૦॥

સ વસ્તુધર્મો નો યસ્માન્મનસ્યેવોપલભ્યતે ।
વસ્તુધર્મસ્ય મનસિ કથં સ્યાદુપલમ્ભનમ્ ॥ ૬૪૧॥

અન્યત્ર ત્વન્યધર્માણામુપલમ્ભો ન દૃશ્યતે ।
તસ્માન્ન વસ્તુધર્મોઽયમાનન્દસ્તુ કદાચન ॥ ૬૪૨॥

નાપ્યેષ ધર્મો મનસોઽસત્યર્થે તદદર્શનાત્ ।
અસતિ વ્યઞ્જકે વ્યઙ્ગ્યં નોદેતીતિ ન મન્યતામ્ ॥ ૬૪૩॥

સત્યર્થેઽપિ ચ નોદેતિ હ્યાનન્દસ્તૂક્તલક્ષણઃ ।
સત્યપિ વ્યઞ્જકે વ્યઙ્ગ્યાનુદયો નૈવ સમ્મતઃ ॥ ૬૪૪॥

દુરદૃષ્ટાદિકં નાત્ર પ્રતિબન્ધઃ પ્રકલ્પ્યતામ્ ।
પ્રિયસ્ય વસ્તુનો લાભે દુરદૃષ્ટં ન સિધ્યતિ ॥ ૬૪૫॥

તસ્માન્ન માનસો ધર્મો નિર્ગુણત્વાન્ન ચાત્મનઃ ।
કિં તુ પુણ્યસ્ય સાંનિધ્યાદિષ્ટસ્યાપિ ચ વસ્તુનઃ ॥ ૬૪૬॥

સત્ત્વપ્રધાને ચિત્તેઽસ્મિંસ્ત્વાત્મૈવ પ્રતિબિમ્બતિ ।
આનન્દલક્ષણઃ સ્વચ્છે પયસીવ સુધાકરઃ ॥ ૬૪૭॥

સોઽયમાભાસ આનન્દશ્ચિત્તે યઃ પ્રતિબિમ્બિતઃ ।
પુણ્યોત્કર્ષાપકર્ષાભ્યાં ભવત્યુચ્ચાવચઃ સ્વયમ્ ॥ ૬૪૮॥

સાર્વભૌમાદિબ્રહ્માન્તં શ્રુત્યા યઃ પ્રતિપાદિતઃ ।
સ ક્ષયિષ્ણુઃ સાતિશયઃ પ્રક્ષીણે કારણે લયમ્ ॥ ૬૪૯॥

યાત્યેષ વિષયાનન્દો યસ્તુ પુણ્યૈકસાધનઃ ।
યે તુ વૈષયિકાનન્દં ભુઞ્જતે પુણ્યકારિણઃ ॥ ૬૫૦॥

દુઃખં ચ ભોગકાલેઽપિ તેષામન્તે મહત્તરમ્ ।
સુખં વિષયસમ્પૃક્તં વિષસમ્પૃક્તભક્તવત્ ॥ ૬૫૧॥

ભોગકાલેઽપિ ભોગાન્તે દુઃખમેવ પ્રયચ્છતિ ।
સુખમુચ્ચાવચત્વેન ક્ષયિષ્ણુત્વભયેન ચ ॥ ૬૫૨॥

ભોગકાલે ભવેન્નૄણાં બ્રહ્માદિપદભાજિનામ્ ।
રાજસ્થાનપ્રવિષ્ટાનાં તારતમ્યં મતં યથા ॥ ૬૫૩॥

તથૈવ દુઃખં જન્તૂનાં બ્રહ્માદિપદભાજિનામ્ ।
ન કાઙ્ક્ષણીયં વિદુષા તસ્માદ્વૈષયિકં સુખમ્ ॥ ૬૫૪॥

યો બિમ્બભૂત આનન્દઃ સ આત્માનન્દલક્ષણઃ ।
શાશ્વતો નિર્દ્વયઃ પૂર્ણો નિત્ય એકોઽપિ નિર્ભયઃ ॥ ૬૫૫॥

લક્ષ્યતે પ્રતિબિમ્બેનાભાસાનન્દેન બિમ્બવત્ ।
પ્રતિબિમ્બો બિમ્બમૂલો વિના બિમ્બં ન સિધ્યતિ ॥ ૬૫૬॥

યત્તતો બિમ્બ આનન્દઃ પ્રતિબિમ્બેન લક્ષ્યતે ।
યુક્ત્યૈવ પણ્ડિતજનૈર્ન કદાપ્યનુભૂયતે ॥ ૬૫૭॥

અવિદ્યાકાર્યકરણસઙ્ઘાતેષુ પુરોદિતઃ ।
આત્મા જાગ્રત્યપિ સ્વપ્ને ન ભવત્યેષ ગોચરઃ ॥ ૬૫૮॥

સ્થૂલસ્યાપિ ચ સૂક્ષ્મસ્ય દુઃખરૂપસ્ય વર્ષ્મણઃ ।
લયે સુષુપ્તૌ સ્ફુરતિ પ્રત્યગાનન્દલક્ષણઃ ॥ ૬૫૯॥

ન હ્યત્ર વિષયઃ કશ્ચિન્નાપિ બુદ્ધ્યાદિ કિઞ્ચન ।
આત્મૈવ કેવલાનન્દમાત્રસ્તિષ્ઠતિ નિર્દ્વયઃ ॥ ૬૬૦॥

પ્રત્યભિજ્ઞાયતે સર્વૈરેષ સુપ્તોત્થિતૈર્જનૈઃ ।
સુખમાત્રતયા નાત્ર સંશયં કર્તુમર્હસિ ॥ ૬૬૧॥

ત્વયાપિ પ્રત્યભિજ્ઞાતં સુખમાત્રત્વમાત્મનઃ ।
સુષુપ્તાદુત્થિતવતા સુખમસ્વાપ્સમિત્યનુ ॥ ૬૬૨॥

દુઃખાભાવઃ સુખમિતિ યદુક્તં પૂર્વવાદિના ।
અનાઘ્રાતોપનિષદા તદસારં મૃષા વચઃ ॥ ૬૬૩॥

દુઃખાભાવસ્તુ લોષ્ટાદૌ વિદ્યતે નાનુભૂયતે ।
સુખલેશોઽપિ સર્વેષાં પ્રત્યક્ષં તદિદં ખલુ ॥ ૬૬૪॥

સદયં હ્યેષ એવેતિ પ્રસ્તુત્ય વદતિ શ્રુતિઃ ।
સદ્ઘનોઽયં ચિદ્ઘનોઽયમાનન્દઘન ઇત્યપિ ॥ ૬૬૫॥

આનન્દઘનતામસ્ય સ્વરૂપં પ્રત્યગાત્મનઃ ।
ધન્યૈર્મહાત્મભિધીરૈર્બ્રહ્મવિદ્ભિઃ સદુત્તમૈઃ ॥ ૬૬૬॥

અપરોક્ષતયૈવાત્મા સમાધાવનુભૂયતે ।
કેવલાનન્દમાત્રત્વેનૈવમત્ર ન સંશયઃ ॥ ૬૬૭॥

સ્વસ્વોપાધ્યનુરૂપેણ બ્રહ્માદ્યાઃ સર્વજન્તવઃ ।
ઉપજીવન્ત્યમુષ્યૈવ માત્રામાનન્દલક્ષણામ્ ॥ ૬૬૮॥

આસ્વાદ્યતે યો ભક્ષ્યેષુ સુખકૃન્મધુરો રસઃ ।
સ ગુડસ્યૈવ નો તેષાં માધુર્યં વિદ્યતે ક્વચિત્ ॥ ૬૬૯॥

તદ્વદ્વિષયસાંનિધ્યાદાનન્દો યઃ પ્રતીયતે ।
બિમ્બાનન્દાંશવિસ્ફૂર્તિરેવાસૌ ન જડાત્મનામ્ ॥ ૬૭૦॥

યસ્ય કસ્યાપિ યોગેન યત્ર કુત્રાપિ દૃશ્યતે ।
આનન્દઃ સ પરસ્યૈવ બ્રહ્મણઃ સ્ફૂર્તિલક્ષણઃ ॥ ૬૭૧॥

યથા કુવલયોલ્લાસશ્ચન્દ્રસ્યૈવ પ્રસાદતઃ ।
તથાનન્દોદયોઽપ્યેષાં સ્ફુરણાદેવ વસ્તુનઃ ॥ ૬૭૨॥

# verses 673-702 The non-dual nature of the Atman

॥ ૩૪ ॥ અદ્વિતીયત્વમ્ ॥

સત્ત્વં ચિત્ત્વં તથાનન્દઃ સ્વરૂપં પરમાત્મનઃ । તથાનન્દસ્વરૂપં
નિર્ગુણસ્ય ગુણાયોગાદ્ગુણાસ્તુ ન ભવન્તિ તે ॥ ૬૭૩॥

વિશેષણં તુ વ્યાવૃત્ત્યૈ ભવેદ્દ્રવ્યાન્તરે સતિ ।
પરમાત્માદ્વિતીયોઽયં પ્રપઞ્ચસ્ય મૃષાત્વતઃ ॥ ૬૭૪॥

વસ્ત્વન્તરસ્યાભાવેન ન વ્યાવર્ત્યઃ કદાચન ।
કેવલો નિર્ગુણશ્ચેતિ નિર્ગુણત્વં નિરુચ્યતે ॥ ૬૭૫॥

શ્રુત્યૈવ ન તતસ્તેષાં ગુણત્વમુપપદ્યતે ।
ઉષ્ણત્વં ચ પ્રકાશશ્ચ યથા વહ્નેસ્તથાત્મનઃ ॥ ૬૭૬॥

સત્ત્વચિત્ત્વાનન્દતાદિ સ્વરૂપમિતિ નિશ્ચિતમ્ ।
અત એવ સજાતીયવિજાતીયાદિલક્ષણઃ ॥ ૬૭૭॥

ભેદો ન વિદ્યતે વસ્તુન્યદ્વિતીયે પરાત્મનિ ।
પ્રપઞ્ચસ્યાપવાદેન વિજાતીયકૃતા ભિદા ॥ ૬૭૮॥

નેષ્યતે તત્પ્રકારં તે વક્ષ્યામિ શ‍ૃણુ સાદરમ્ ।
અહેર્ગુણવિવર્તસ્ય ગુણમાત્રત્વવત્ સતઃ ॥ ૬૭૯॥

વિવર્તસ્યાસ્ય જગતઃ સન્માત્રત્વેન દર્શનમ્ ।
અપવાદ ઇતિ પ્રાહુરદ્વૈતબ્રહ્મદર્શિનઃ ॥ ૬૮૦॥

વ્યુત્ક્રમેણ તદુત્પત્તેર્દ્રષ્ટવ્યં સૂક્ષ્મબુદ્ધિભિઃ ।
પ્રતીતસ્યાસ્ય જગતઃ સન્માત્રત્વં સુયુક્તિભિઃ ॥ ૬૮૧॥

ચતુર્વિધં સ્થૂલશરીરજાતં
તદ્ભોજ્યમન્નાદિ તદાશ્રયાદિ ।
બ્રહ્માણ્ડમેતત્સકલં સ્થવિષ્ઠ-
મીક્ષેત પઞ્ચીકૃતભૂતમાત્રમ્ ॥ ૬૮૨॥

યત્કાર્યરૂપેણ યદીક્ષ્યતે ત-
ત્તન્માત્રમેવાત્ર વિચાર્યમાણે ।
મૃત્કાર્યભૂતં કલશાદિ સમ્ય-
ગ્વિચારિતં સન્ન મૃદો વિભિદ્યતે ॥ ૬૮૩॥

અન્તર્બહિશ્ચાપિ મૃદેવ દૃશ્યતે
    મૃદો ન ભિન્નં કલશાદિ કિઞ્ચન ।
ગ્રીવાદિમદ્યત્કલશં તદિત્થં
    ન વાચ્યમેતચ્ચ મૃદેવ નાન્યત્ ॥ ૬૮૪॥

સ્વરૂપતસ્તત્કલશાદિનામ્ના
    મૃદેવ મૂઢૈરભિધીયતે તતઃ ।
નામ્નો હિ ભેદો ન તુ વસ્તુભેદઃ
    પ્રદૃશ્યતે તત્ર વિચાર્યમાણે ॥ ૬૮૫॥

તસ્માદ્ધિ કાર્યં ન કદાપિ ભિન્નં
    સ્વકારણાદસ્તિ યતસ્તતોઽઙ્ગ ।
યદ્ભૌતિકં સર્વમિદં તથૈવ
    તદ્ભૂતમાત્રં ન તતોઽપિ ભિન્નમ્ ॥ ૬૮૬॥

તચ્ચાપિ પઞ્ચીકૃતભૂતજાતં
    શબ્દાદિભિઃ સ્વસ્વગુણૈશ્ચ સાર્ધં
વપૂંષિ સૂક્ષ્માણિ ચ સર્વમેત-
    દ્ભવત્યપઞ્ચીકૃતભૂતમાત્રમ્ ॥ ૬૮૭॥

તદપ્યપઞ્ચીકૃતભૂતજાતં
    રજસ્તમઃસત્ત્વગુણૈશ્ચ સાર્ધમ્ ।
અવ્યક્તમાત્રં ભવતિ સ્વરૂપતઃ
    સાભાસમવ્યક્તમિદં સ્વયં ચ ॥ ૬૮૮॥

આધારભૂતં યદખણ્ડમાદ્યં
    શુદ્ધં પરં બ્રહ્મ સદૈકરૂપમ્ ।
સન્માત્રમેવાસ્ત્યથ નો વિકલ્પઃ
    સતઃ પરં કેવલમેવ વસ્તુ ॥ ૬૮૯॥

એકશ્ચન્દ્રઃ સદ્વિતીયો યથા સ્યા-
    દ્દૃષ્ટેર્દોષાદેવ પુંસસ્તથૈકમ્ ।
બ્રહ્માસ્ત્યેતદ્બુદ્ધિદોષેણ નાના
    દોષે નષ્ટે ભાતિ વસ્ત્વેકમેવ ॥ ૬૯૦॥

રજ્જોઃ સ્વરૂપાધિગમેન સર્પધી
    રજ્જ્વાં વિલીના તુ યથા તથૈવ ।

બ્રહ્માવગત્યા તુ જગત્પ્રતીતિ-
સ્તત્રૈવ લીના તુ સહ ભ્રમેણ ॥ ૬૯૧॥

ભ્રાન્ત્યોદિતદ્વૈતમતિપ્રશાન્ત્યા
સદૈકમેવાસ્તિ સદાદ્વિતીયમ્ ।
તતો વિજાતીયકૃતોઽત્ર ભેદો
ન વિદ્યતે બ્રહ્મણિ નિર્વિકલ્પે ॥ ૬૯૨॥

યદાસ્ત્યુપાધિસ્તદભિન્ન આત્મા
તદા સજાતીય ઇવાવભાતિ ।
સ્વપ્નાર્થવત્તસ્ય મૃષાત્મકત્વા-
ત્તદપ્રતીતૌ સ્વયમેષ આત્મા ।
બ્રહ્મૈક્યતામેતિ પૃથઙ્ ન ભાતિ
તતઃ સજાતીયકૃતો ન ભેદઃ ॥ ૬૯૩॥

ઘટાભાવે ઘટાકાશો મહાકાશો યથા તથા ।
ઉપાધ્યભાવે ત્વાત્મૈષ સ્વયં બ્રહ્મૈવ કેવલમ્ ॥ ૬૯૪॥

પૂર્ણ એવ સદાકાશો ઘટે સત્યપ્યસત્યપિ ।
નિત્યપૂર્ણસ્ય નભસો વિચ્છેદઃ કેન સિધ્યતિ ॥ ૬૯૫॥

અચ્છિન્નશ્છિન્નવદ્ભાતિ પામરાણાં ઘટાદિના ।
ગ્રામક્ષેત્રાદ્યવધિભિર્ભિન્નેવ વસુધા યથા ॥ ૬૯૬॥

તથૈવ પરમં બ્રહ્મ મહતાં ચ મહત્તમમ્ ।
પરિચ્છિન્નમિવાભાતિ ભ્રાન્ત્યા કલ્પિતવસ્તુના ॥ ૬૯૭॥

તસ્માદ્બ્રહ્માત્મનોર્ભેદઃ કલ્પિતો ન તુ વાસ્તવઃ ।
અત એવ મુહુઃ શ્રુત્યાપ્યેકત્વં પ્રતિપાદ્યતે ॥ ૬૯૮॥

બ્રહ્માત્મનોસ્તત્ત્વમસીત્યદ્વયત્વોપપત્તયે ।
પ્રત્યક્ષાદિવિરોધેન વાચ્યયોર્નોપપદ્યતે ।
તત્ત્વમ્પદાર્થયોરૈક્યં લક્ષ્યયોરેવ સિધ્યતિ ॥ ૬૯૯॥

શિષ્યઃ -
સ્યાત્તત્ત્વમ્પદયોઃ સ્વામિનર્થઃ કતિવિધો મતઃ ।
પદયોઃ કો નુ વાચ્યાર્થો લક્ષ્યાર્થ ઉભયોશ્ચ કઃ ॥ ૭૦૦॥

વાચ્યૈકત્વવિવક્ષાયાં વિરોધઃ કઃ પ્રતીયતે ।

લક્ષ્યાર્થયોરભિન્નત્વે સ કથં વિનિવર્તતે ॥ ૭૦૧॥

એકત્વકથને કા વા લક્ષણાત્રોરરીકૃતા ।
એતત્સર્વં કરુણયા સમ્યક્ત્વં પ્રતિપાદય ॥ ૭૦૨॥

## verses 703-708 The meaning of the words 'That' and 'Thou'

॥ ૩૫ ॥ તત્ત્વમ્પદયોરર્થઃ ॥

શ ृણુષ્વાવહિતો વિદ્વન્નદ્ય તે ફલિતં તપઃ ।
વાક્યાર્થશ્રુતિમાત્રેણ સમ્યગ્જ્ઞાનં ભવિષ્યતિ ॥ ૭૦૩॥

યાવન્ન તત્ત્વમ્પદયોરર્થઃ સમ્યગ્વિચાર્યતે ।
તાવદેવ નૃણાં બન્ધો મૃત્યુસંસારલક્ષણઃ ॥ ૭૦૪॥

અવસ્થા સચ્ચિદાનન્દાખણ્ડૈકરસરૂપિણી ।
મોક્ષઃ સિધ્યતિ વાક્યાર્થાપરોક્ષજ્ઞાનતઃ સતામ્ ॥ ૭૦૫॥

વાક્યાર્થ એવ જ્ઞાતવ્યો મુમુક્ષોર્ભવમુક્તયે ।
તસ્માદવહિતો ભૂત્વા શ ृણુ વક્ષ્યે સમાસતઃ ॥ ૭૦૬॥

અર્થા બહુવિધાઃ પ્રોક્તા વાક્યાનાં પણ્ડિતોત્તમૈઃ ।
વાચ્યલક્ષ્યાદિભેદેન પ્રસ્તુતં શ્રૂયતાં ત્વયા ॥ ૭૦૭॥

વાક્યે તત્ત્વમસીત્યત્ર વિદ્યતે યત્પદત્રયમ્ ।
તત્રાદૌ વિદ્યમાનસ્ય તત્પદસ્ય નિગદ્યતે ॥ ૭૦૮॥

## verses 709-732 The direct meaning of the word 'That'

॥ ૩૬ ॥ તત્પદસ્ય સમ્યગર્થઃ ॥

શાસ્ત્રાર્થકોવિદૈરર્થો વાચ્યો લક્ષ્ય ઇતિ દ્વિધા ।
વાચ્યાર્થં તે પ્રવક્ષ્યામિ પણ્ડિતૈર્ય ઉદીરિતઃ ॥ ૭૦૯॥

સમષ્ટિરૂપમજ્ઞાનં સાભાસં સત્ત્વબૃંહિતમ્ ।
વિયદાદિવિરાડન્તં સ્વકાર્યેણ સમન્વિતમ્ ॥ ૭૧૦॥

ચૈતન્યં તદવચ્છિન્નં સત્યજ્ઞાનાદિલક્ષણમ્ ।
સર્વજ્ઞત્વેશ્વરત્વાન્તર્યામિત્વાદિગુણૈર્યુતમ્ ॥ ૭૧૧॥

જગત્સ્રષ્ટૃત્વપાતૃત્વસંહર્તૃત્વાદિધર્મકમ્ ।
સર્વાત્મના ભાસમાનં યદમેયં ગુણૈશ્ચ તત્ ॥ ૭૧૨॥

અવ્યક્તમપરં બ્રહ્મ વાચ્યાર્થ ઇતિ કથ્યતે ।
નીલમુત્પલમિત્યત્ર યથા વાક્યાર્થસઙ્ગતિઃ ॥ ૭૧૩॥

તથા તત્ત્વમસીત્યત્ર નાસ્તિ વાક્યાર્થસઙ્ગતિઃ ।
પટાદ્વ્યાવર્તતે નીલ ઉત્પલેન વિશેષિતઃ ॥ ૭૧૪॥

શૌક્લ્યાદ્વ્યાવર્તતે નીલેનોત્પલં તુ વિશેષિતમ્ ।
ઇત્થમન્યોન્યભેદસ્ય વ્યાવર્તકતયા તયોઃ ॥ ૭૧૫॥

વિશેષણવિશેષ્યત્વસંસર્ગસ્યેતરસ્ય વા ।
વાક્યાર્થત્વે પ્રમાણાન્તરવિરોધો ન વિદ્યતે ॥ ૭૧૬॥

અતઃ સઙ્ગચ્છતે સમ્યગ્વાક્યાર્થો બાધવર્જિતઃ ।
એવં તત્ત્વમસીત્યત્ર વાક્યાર્થો ન સમઞ્જસઃ ॥ ૭૧૭॥

તદર્થસ્ય પરોક્ષત્વાદિવિશિષ્ટચિતેરપિ ।
ત્વમર્થસ્યાપરોક્ષત્વાદિવિશિષ્ટચિતેરપિ ॥ ૭૧૮॥

તથૈવાન્યોન્યભેદસ્ય વ્યાવર્તકતયા તયોઃ ।
વિશેષણવિશેષ્યત્વસંસર્ગસ્યેતરસ્ય વા ॥ ૭૧૯॥

વાક્યાર્થત્વે વિરોધોઽસ્તિ પ્રત્યક્ષાદિકૃતસ્તતઃ ।
સઙ્ગચ્છતે ન વાક્યાર્થસ્તદ્વિરોધં ચ વચ્મિ તે ॥ ૭૨૦॥

સર્વેશત્વસ્વતન્ત્રત્વસર્વજ્ઞત્વાદિભિર્ગુણૈઃ ।
સર્વોત્તમઃ સત્યકામઃ સત્યસઙ્કલ્પ ઈશ્વરઃ ॥ ૭૨૧॥

તત્પદાર્થસ્ત્વમર્થસ્તુ કિઞ્ચિજ્જ્ઞો દુઃખજીવનઃ ।
સંસાર્યયં તદ્ગતિકો જીવઃ પ્રાકૃતલક્ષણઃ ॥ ૭૨૨॥

કથમેકત્વમનયોર્ઘટતે વિપરીતયોઃ ।
પ્રત્યક્ષેણ વિરોધોઽયમુભયોરુપલભ્યતે ॥ ૭૨૩॥

વિરુદ્ધધર્માક્રાન્તત્વાત્પરસ્પરવિલક્ષણૌ ।
જીવેશૌ વહ્નિતુહિનાવિવ શબ્દાર્થતોઽપિ ચ ॥ ૭૨૪॥

પ્રત્યક્ષાદિવિરોધઃ સ્યાદિત્યૈક્યે તયોઃ પરિત્યક્તે ।
શ્રુતિવચનવિરોધો ભવતિ મહાન્સ્મૃતિવચનવિરોધશ્ચ ॥ ૭૨૫॥

શ્રુત્યાપ્યેકત્વમનયોસ્તાત્પર્યેણ નિગદ્યતે ।
મુહુસ્તત્ત્વમસીત્યસ્માદઙ્ગીકાર્યં શ્રુતેર્વચઃ ॥ ૭૨૬॥

વાક્યાર્થત્વે વિશિષ્ટસ્ય સંસર્ગસ્ય ચ વા પુનઃ ।
અયથાર્થતયા સોઽયં વાક્યાર્થો ન મતઃ શ્રુતેઃ ॥ ૭૨૭॥

અખણ્ડૈકરસત્વેન વાક્યાર્થઃ શ્રુતિસમ્મતઃ ।
સ્થૂલસૂક્ષ્મપ્રપઞ્ચસ્ય સન્માત્રત્વં પુનઃ પુનઃ ॥ ૭૨૮॥

દર્શયિત્વા સુષુપ્તૌ તદ્બ્રહ્માભિન્નત્વમાત્મનઃ ।
ઉપપાદ્ય સદૈકત્વં પ્રદર્શયિતુમિચ્છયા ॥ ૭૨૯॥

ઐતદાત્મ્યમિદં સર્વમિત્યુક્ત્વૈવ સદાત્મનોઃ । ત્યુક્તૈવ
બ્રવીતિ શ્રુતિરેકત્વં બ્રહ્મણોઽદ્વૈતસિદ્ધયે ॥ ૭૩૦॥

સતિ પ્રપઞ્ચે જીવે વાઽદ્વૈતત્વં બ્રહ્મણઃ કુતઃ ।
અતસ્તયોરખણ્ડત્વમેકત્વં શ્રુતિસમ્મતમ્ ॥ ૭૩૧॥

વિરુદ્ધાંશપરિત્યાગાત્પ્રત્યક્ષાદિર્ન બાધતે ।
અવિરુદ્ધાંશગ્રહણાન્ન શ્રુત્યાપિ વિરુધ્યતે ॥ ૭૩૨॥

## verses 733-759 The indirect meaning ascertained

॥ ૩૭ ॥ વાચ્યાર્થાનુપપત્તિઃ ॥

લક્ષણા હ્યુપગન્તવ્યા તતો વાક્યાર્થસિદ્ધયે ।
વાચ્યાર્થાનુપપત્ત્યૈવ લક્ષણાભ્યુપગમ્યતે ॥ ૭૩૩॥

સમ્બન્ધોઽનુપપત્ત્યા ચ લક્ષણેતિ જગુર્બુધાઃ ।
ગઙ્ગાયાં ઘોષ ઇત્યાદૌ યા જહલ્લક્ષણા મતા ॥ ૭૩૪॥

ન સા તત્ત્વમસીત્યત્ર વાક્ય એષા પ્રવર્તતે ।
ગઙ્ગાયા અપિ ઘોષસ્યાધારાધેયત્વલક્ષણઃ ॥ ૭૩૫॥

સર્વો વિરુદ્ધો વાક્યાર્થસ્તત્ર પ્રત્યક્ષતસ્તતઃ ।
ગઙ્ગાસમ્બન્ધવત્તીરે લક્ષણા સમ્પ્રવર્તતે ॥ ૭૩૬॥

તથા તત્ત્વમસીત્યત્ર ચૈતન્યૈકત્વલક્ષણે ।
વિવક્ષિતે તુ વાક્યાર્થેઽપરોક્ષત્વાદિલક્ષણઃ ॥ ૭૩૭॥

વિરુધ્યતે ભાગમાત્રો ન તુ સર્વો વિરુધ્યતે ।
તસ્માજ્જહલ્લક્ષણાયાઃ પ્રવૃત્તિર્નાત્ર યુજ્યતે ॥ ૭૩૮॥

વાચ્યાર્થસ્ય તુ સર્વસ્ય ત્યાગે ન ફલમીક્ષ્યતે ।
નાલિકેરફલસ્યેવ કઠિનત્વધિયા નૃણામ્ ॥ ૭૩૯॥

ગઙ્ગાપદં યથા સ્વાર્થં ત્યક્ત્વા લક્ષયતે તટમ્ ।
તત્પદં ત્વમ્પદં વાપિ ત્યક્ત્વા સ્વાર્થં યથાખિલમ્ ॥ ૭૪૦॥

ત્વમર્થં વા ત્વદર્થં વા યદિ લક્ષયતિ સ્વયમ્ ।
તદા જહલ્લક્ષણાયાઃ પ્રવૃત્તિરુપપદ્યતે ॥ ૭૪૧॥

ન શઙ્કનીયમિત્યાર્યૈર્જ્ઞાતાર્થે ન હિ લક્ષણા ।
તત્પદં ત્વમ્પદં વાપિ શ્રૂયતે ચ પ્રતીયતે ॥ ૭૪૨॥

તદર્થશ્ચ કથં તત્ર સમ્પ્રવર્તેત લક્ષણા ।
અત્ર શોણો ધાવતીતિ વાક્યવન્ન પ્રવર્તતે ॥ ૭૪૩॥

અજહલ્લક્ષણા વાપિ સા જહલ્લક્ષણા યથા ।
ગુણસ્ય ગમનં લોકે વિરુદ્ધં દ્રવ્યમન્તરા ॥ ૭૪૪॥

અતસ્તમપરિત્યજ્ય તદ્ગુણાશ્રયલક્ષણઃ ।
લક્ષ્યાદિર્લક્ષ્યતે તત્ર લક્ષણાસૌ પ્રવર્તતે ॥ ૭૪૫॥

વાક્યે તત્ત્વમસીત્યત્ર બ્રહ્માત્મૈકત્વબોધકે ।
પરોક્ષત્વાપરોક્ષત્વાદિવિશિષ્ટચિતોર્દ્વયોઃ ॥ ૭૪૬॥

એકત્વરૂપવાક્યાર્થો વિરુદ્ધાંશાવિવર્જનાત્ ।
ન સિધ્યતિ યતસ્તસ્માન્નાજહલ્લક્ષણા મતા ॥ ૭૪૭॥

તત્પદં ત્વમ્પદં ચાપિ સ્વકીયાર્થવિરોધિનમ્ ।
અંશં સમ્યક્પરિત્યજ્ય સ્વાવિરુદ્ધાંશસંયુતમ્ ॥ ૭૪૮॥

ત્વમર્થં વા ત્વદર્થં વા સમ્યગ્લક્ષયતઃ સ્વયમ્ ।
ભાગલક્ષણયા સાધ્યં કિમસ્તીતિ ન શઙ્ક્યતામ્ ॥ ૭૪૯॥

અવિરુદ્ધં પદાર્થાન્તરાંશં સ્વાંશં ચ તત્કથમ્ ।
એકં પદં લક્ષણયા સંલક્ષયિતુમર્હતિ ॥ ૭૫૦॥

પદાન્તરેણ સિદ્ધાયાં પદાર્થપ્રમિતૌ સ્વતઃ ।

તદર્થપ્રત્યયાપેક્ષા પુનર્લક્ષણયા કુતઃ ॥ ૭૫૧॥

તસ્માત્તત્ત્વમસીત્યત્ર લક્ષણા ભાગલક્ષણા ।
વાક્યાર્થસ્ય ત્વખણ્ડૈકરસતાસિદ્ધયે મતા ॥ ૭૫૨॥

ભાગં વિરુદ્ધં સન્ત્યજ્યાવિરોધો લક્ષ્યતે યયા ।
સા ભાગલક્ષણેત્યાહુર્લક્ષણજ્ઞા વિચક્ષણાઃ ॥ ૭૫૩॥

સોઽયં દેવદત્ત ઇતિ વાક્યં વાક્યાર્થ એવ વા ।
દેવદત્તૈક્યરૂપસ્વવાક્યાર્થાનવબોધકમ્ ॥ ૭૫૪॥

દેશકાલાદિવૈશિષ્ટ્યં વિરુદ્ધાંશં નિરસ્ય ચ ।
અવિરુદ્ધં દેવદત્તદેહમાત્રં સ્વલક્ષણમ્ ॥ ૭૫૫॥

ભાગલક્ષણયા સમ્યગ્લક્ષયત્યનયા યથા ।
તથા તત્ત્વમસીત્યત્ર વાક્યં વાક્યાર્થ એવ વા ॥ ૭૫૬॥

પરોક્ષત્વાપરોક્ષત્વાદિવિશિષ્ટચિતોર્દ્વયોઃ ।
એકત્વરૂપવાક્યાર્થવિરુદ્ધાંશમુપસ્થિતમ્ ॥ ૭૫૭॥

પરોક્ષત્વાપરોક્ષત્વસર્વજ્ઞત્વાદિલક્ષણમ્ ।
બુદ્ધ્યાદિસ્થૂલપર્યન્તમાવિદ્યકમનાત્મકમ્ ॥ ૭૫૮॥

પરિત્યજ્યાવિરુદ્ધાંશં શુદ્ધચૈતન્યલક્ષણમ્ ।
વસ્તુ કેવલસન્માત્રં નિર્વિકલ્પં નિરઞ્જનમ્ ॥ ૭૫૯॥

## verses 760-794 The unified meaning

॥ ૩૮ ॥ અર્થસમન્વયઃ ॥

લક્ષયત્યનયા સમ્યગ્ભાગલક્ષણયા તતઃ ।
સર્વોપાધિવિનિર્મુક્તં સચ્ચિદાનન્દમદ્વયમ્ ॥ ૭૬૦॥

નિર્વિશેષં નિરાભાસમતાદૃશમનીદૃશમ્ ।
અનિર્દેશ્યમનાદ્યન્તમનન્તં શાન્તમચ્યુતમ્ ।
અપ્રતર્ક્યમવિજ્ઞેયં નિર્ગુણં બ્રહ્મ શિષ્યતે ॥ ૭૬૧॥

ઉપાધિવૈશિષ્ટ્યકૃતો વિરોધો
બ્રહ્માત્મનોરેકતયાધિગત્યામ્ ।
ઉપાધિવૈશિષ્ટ્ય ઉદસ્યમાને

ન કશ્ચિદપ્યસ્તિ વિરોધ એતયોઃ ॥ ૭૬૨॥

તયોરુપાધિશ્ચ વિશિષ્ટતા ચ
તદ્ધર્મભાક્ત્વં ચ વિલક્ષણત્વમ્ ।
ભ્રાન્ત્યા કૃતં સર્વમિદં મૃષૈવ
સ્વપ્નાર્થવજ્જાગ્રતિ નૈવ સત્યમ્ ॥ ૭૬૩॥

નિદ્રાસૂતશરીરધર્મસુખદુઃખાદિપ્રપઞ્ચોઽપિ વા
જીવેશાદિભિદાપિ વા ન ચ ઋતં કર્તું ક્વચિચ્છક્યતે ।
માયાકલ્પિતદેશકાલજગદીશાદિભ્રમસ્તાદૃશઃ
કો ભેદોઽસ્ત્યનયોર્દ્વયોસ્તુ કતમઃ સત્યોઽન્યતઃ કો ભવેત્ ॥ ૭૬૪॥

ન સ્વપ્નજાગરણયોરુભયોર્વિશેષઃ
સંદૃશ્યતે ક્વચિદપિ ભ્રમજૈર્વિકલ્પૈઃ ।
યદ્દ્રષ્ટૃદર્શનમુખૈરત એવ મિથ્યા
સ્વપ્નો યથા નનુ તથૈવ હિ જાગરોઽપિ ॥ ૭૬૫॥

અવિદ્યાકાર્યતસ્તુલ્યૌ દ્વાવપિ સ્વપ્નજાગરૌ ।
દ્રષ્ટૃદર્શનદૃશ્યાદિકલ્પનોભયતઃ સમા ॥ ૭૬૬॥

અભાવ ઉભયોઃ સુપ્તૌ સર્વૈરપ્યનુભૂયતે ।
ન કશ્ચિદનયોર્ભેદસ્તસ્માન્મિથ્યાત્વમર્હતઃ ॥ ૭૬૭॥

ભ્રાન્ત્યા બ્રહ્મણિ ભેદોઽયં સજાતીયાદિલક્ષણઃ ।
કાલત્રયેઽપિ હે વિદ્વન્ વસ્તુતો નૈવ કશ્ચન ॥ ૭૬૮॥

યત્ર નાન્યત્પશ્યતીતિ શ્રુતિર્દ્વૈતં નિષેધતિ ।
કલ્પિતસ્ય ભ્રમાદ્ભૂમ્નિ મિથ્યાત્વાવગમાય તત્ ॥ ૭૬૯॥

યતસ્તતો બ્રહ્મ સદાદ્વિતીયં
વિકલ્પશૂન્યં નિરુપાધિ નિર્મલમ્ ।
નિરન્તરાનન્દઘનં નિરીહં
નિરાસ્પદં કેવલમેકમેવ ॥ ૭૭૦॥

નૈવાસ્તિ કાચન ભિદા ન ગુણપ્રતીતિ-
ર્નો વાક્પ્રવૃત્તિરપિ વા ન મનઃપ્રવૃત્તિઃ ।
યત્કેવલં પરમશાન્તમનન્તમાદ્ય-
માનન્દમાત્રમવભાતિ સદદ્વિતીયમ્ ॥ ૭૭૧॥

યદિદં પરમં સત્યં તત્ત્વં સચ્ચિત્સુખાત્મકમ્ ।
અજરામરણં નિત્યં સત્યમેતદ્વચો મમ ॥ ૭૭૨॥

ન હિ ત્વં દેહોઽસાવસુરપિ ચ વાપ્યક્ષનિકરો
મનો વા બુદ્ધિર્વા ક્વચિદપિ તથાહઙ્કૃતિરપિ ।
ન ચૈષાં સઙ્ઘાતસ્ત્વમુ ભવતિ વિદ્વન્ શૃણુ પરં
યદેતેષાં સાક્ષી સ્ફુરણમમલં તત્ત્વમસિ હિ ॥ ૭૭૩॥

યજ્જાયતે વસ્તુ તદેવ વર્ધતે
તદેવ મૃત્યું સમુપૈતિ કાલે ।
જન્મૈવ તે નાસ્તિ તથૈવ મૃત્યુ-
ર્નાસ્ત્યેવ નિત્યસ્ય વિભોરજસ્ય ॥ ૭૭૪॥

ય એષ દેહો જનિતઃ સ એવ
સમેધતે નશ્યતિ કર્મયોગાત્ ।
ત્વમેતદીયાસ્વખિલાસ્વવસ્થા-
સ્વવસ્થિતઃ સાક્ષ્યસિ બોધમાત્રઃ ॥ ૭૭૫॥

યત્સ્વપ્રકાશમખિલાત્મકમાસુષુપ્તે-
રેકાત્મનાહમહમિત્યવભાતિ નિત્યમ્ ।
બુદ્ધેઃ સમસ્તવિકૃતેરવિકારિ બોદ્ધૃ
યદ્બ્રહ્મ તત્ત્વમસિ કેવલબોધમાત્રમ્ ॥ ૭૭૬॥

સ્વાત્મન્યનસ્તમયસંવિદિ કલ્પિતસ્ય
વ્યોમાદિસર્વજગતઃ પ્રદદાતિ સત્તામ્ ।
સ્ફૂર્તિં સ્વકીયમહસા વિતનોતિ સાક્ષાત્
યદ્બ્રહ્મ તત્ત્વમસિ કેવલબોધમાત્રમ્ ॥ ૭૭૭॥

સમ્યક્સમાધિનિરતૈર્વિમલાન્તરઙ્ગે
સાક્ષાદવેક્ષ્ય નિજતત્ત્વમપારસૌખ્યમ્ ।
સન્તુષ્યતે પરમહંસકુલૈરજસ્રં
યદ્બ્રહ્મ તત્ત્વમસિ કેવલબોધમાત્રમ્ ॥ ૭૭૮॥

અન્તર્બહિઃ સ્વયમખણ્ડિતમેકરૂપ-
મારોપિતાર્થવદુદઞ્ચતિ મૂઢબુદ્ધેઃ ।
મૃત્સ્નાદિવદ્વિગતવિક્રિયમાત્મવેદ્યં
યદ્બ્રહ્મ તત્ત્વમસિ કેવલબોધમાત્રમ્ ॥ ૭૭૯॥

શ્રુત્યુક્તમવ્યયમનન્તમનાદિમધ્ય-
મવ્યક્તમક્ષરમનાશ્રયમપ્રમેયમ્ ।
આનન્દસદ્ઘનમનામયમદ્વિતીયં
યદ્બ્રહ્મ તત્ત્વમસિ કેવલબોધમાત્રમ્ ॥ ૭૮૦॥

શરીરતદ્યોગતદીયધર્મા-
દ્યારોપણં ભ્રાન્તિવશાત્ત્વયીદમ્ ।
ન વસ્તુતઃ કિઞ્ચિદતસ્ત્વજસ્ત્વં
મૃત્યોર્ભયં ક્વાસ્તિ તવાસિ પૂર્ણઃ ॥ ૭૮૧॥

યદ્યદ્દૃષ્ટં ભ્રાન્તિમત્યા સ્વદૃષ્ટ્યા
તત્તત્સમ્યગ્વસ્તુદૃષ્ટ્યા ત્વમેવ ।
ત્વત્તો નાન્યદ્વસ્તુ કિઞ્ચિત્તુ લોકે
કસ્માદ્ભીતિસ્તે ભવેદદ્વયસ્ય ॥ ૭૮૨॥

પશ્યતસ્ત્વહમેવેદં સર્વમિત્યાત્મનાખિલમ્ ।
ભયં સ્યાદ્વિદુષઃ કસ્માત્સ્વસ્માન્ન ભયમિષ્યતે ॥ ૭૮૩॥

તસ્માત્ત્વમભયં નિત્યં કેવલાનન્દલક્ષણમ્ ।
નિષ્કલં નિષ્ક્રિયં શાન્તં બ્રહ્મૈવાસિ સદાદ્વયમ્ ॥ ૭૮૪॥

જ્ઞાતૃજ્ઞાનજ્ઞેયવિહીનં જ્ઞાતુરભિન્નં જ્ઞાનમખણ્ડમ્ ।
જ્ઞેયાજ્ઞેયત્વાદિવિમુક્તં શુદ્ધં બુદ્ધં તત્ત્વમસિ ત્વમ્ ॥ ૭૮૫॥

અન્તઃપ્રજ્ઞત્વાદિવિકલ્પૈરસ્પૃષ્ટં યત્તદ્દૃશિમાત્રમ્ ।
સત્તામાત્રં સમરસમેકં શુદ્ધં બુદ્ધં તત્ત્વમસિ ત્વમ્ ॥ ૭૮૬॥

સર્વાકારં સર્વમસર્વં સર્વનિષેધાવધિભૂતં યત્ ।
સત્યં શાશ્વતમેકમનન્તં શુદ્ધં બુદ્ધં તત્ત્વમસિ ત્વમ્ ॥ ૭૮૭॥

નિત્યાનન્દાખણ્ડૈકરસં નિષ્કલમક્રિયમસ્તવિકારમ્ ।
પ્રત્યગભિન્નં પરમવ્યક્તં શુદ્ધં બુદ્ધં તત્ત્વમસિ ત્વમ્ ॥ ૭૮૮॥

ત્વં પ્રત્યસ્તાશેષવિશેષં વ્યોમેવાન્તર્બહિરપિ પૂર્ણમ્ ।
બ્રહ્માનન્દં પરમદ્વૈતં શુદ્ધં બુદ્ધં તત્ત્વમસિ ત્વમ્ ॥ ૭૮૯॥

બ્રહ્મૈવાહમહં બ્રહ્મ નિર્ગુણં નિર્વિકલ્પકમ્ ।
ઇત્યેવાખણ્ડયા વૃત્ત્યા તિષ્ઠ બ્રહ્મણિ નિષ્ક્રિયે ॥ ૭૯૦॥

અખણ્ડામેવૈતાં ઘટિતપરમાનન્દલહરીં
 પરિધ્વસ્તદ્વૈતપ્રમિતિમમલાં વૃત્તિમનિશમ્ ।
અમુઞ્ચાનઃ સ્વાત્મન્યનુપમસુખે બ્રહ્મણિ પરે
 રમસ્વ પ્રારબ્ધં ક્ષપય સુખવૃત્ત્યા ત્વમનયા ॥ ૭૯૧॥

બ્રહ્માનન્દરસાસ્વાદતત્પરેણૈવ ચેતસા ।
સમાધિનિષ્ઠિતો ભૂત્વા તિષ્ઠ વિદ્વન્સદા મુને ॥ ૭૯૨॥

શિષ્યઃ -
અખણ્ડાખ્યા વૃત્તિરેષા વાક્યાર્થશ્રુતિમાત્રતઃ ।
શ્રોતુઃ સંજાયતે કિં વા ક્રિયાન્તરમપેક્ષતે ॥ ૭૯૩॥

સમાધિઃ કઃ કતિવિધસ્તત્સિદ્ધેઃ કિમુ સાધનમ્ ।
સમાધેરન્તરાયાઃ કે સર્વમેતન્નિરૂપ્યતામ્ ॥ ૭૯૪॥

## verses 795-818 The fitness of the aspirant

॥ ૩૯ ॥ અધિકારઃ ॥

શ્રીગુરુઃ -
મુખ્યગૌણાદિભેદેન વિદ્યન્તેઽત્રાધિકારિણઃ ।
તેષાં પ્રજ્ઞાનુસારેણાખણ્ડા વૃત્તિરુદેષ્યતિ ॥ ૭૯૫॥ ઉદેષ્યતે
શ્રદ્ધાભક્તિપુરઃસરેણ વિહિતેનૈવેશ્વરં કર્મણા
 સન્તોષ્યાર્જિતતત્પ્રસાદમહિમા જન્માન્તરેષ્વેવ યઃ ।
નિત્યાનિત્યવિવેકતીવ્રવિરતિન્યાસાદિભિઃ સાધનૈ-
 ર્યુક્તઃ સઃ શ્રવણે સતામભિમતો મુખ્યાધિકારિ દ્વિજઃ ॥ ૭૯૬॥

અધ્યારોપાપવાદક્રમમનુસરતા દેશિકેનાત્ર વેત્રા
 વાક્યાર્થે બોધ્યમાને સતિ સપદિ સતઃ શુદ્ધબુદ્ધેરમુષ્ય ।
નિત્યાનન્દાદ્વિતીયં નિરુપમમમલં યત્પરં તત્ત્વમેકં
 તદ્બ્રહ્મૈવાહમસ્મીત્યુદયતિ પરમાખણ્ડતાકારવૃત્તિઃ ॥ ૭૯૭॥

અખણ્ડાકારવૃત્તિઃ સા ચિદાભાસસમન્વિતા ।
આત્માભિન્નં પરં બ્રહ્મ વિષયીકૃત્ય કેવલમ્ ॥ ૭૯૮॥

બાધતે તદ્ગતાજ્ઞાનં યદાવરણલક્ષણમ્ ।

અખણ્ડાકારયા વૃત્ત્યા ત્વજ્ઞાને બાધિતે સતિ ॥ ૭૯૯॥

તત્કાર્યં સકલં તેન સમં ભવતિ બાધિતમ્ ।
તન્તુદાહે તુ તત્કાર્યપટદાહો યથા તથા ॥ ૮૦૦॥

તસ્ય કાર્યતયા ચિત્તવૃત્તિર્ભવતિ બાધિતા ।
ઉપપ્રભા યથા સૂર્યં પ્રકાશયિતુમક્ષમા ॥ ૮૦૧॥

તદ્વદેવ ચિદાભાસચૈતન્યં વૃત્તિસંસ્થિતમ્ ।
સ્વપ્રકાશં પરં બ્રહ્મ પ્રકાશયિતુમક્ષમમ્ ॥ ૮૦૨॥

પ્રચણ્ડાતપમધ્યસ્થદીપવન્નષ્ટદીધિતિઃ ।
તત્તેજસાભિભૂતં સલ્લીનોપાધિતયા તતઃ ॥ ૮૦૩॥

બિમ્બભૂતપરબ્રહ્મમાત્રં ભવતિ કેવલમ્ ।
યથાપનીતે ત્વાદર્શે પ્રતિબિમ્બમુખં સ્વયમ્ ॥ ૮૦૪॥

મુખમાત્રં ભવેત્તદ્વદેતચ્ચોપાધિસઙ્ક્ષયાત્ ।
ઘટાજ્ઞાને યથા વૃત્ત્યા વ્યાપ્તયા બાધિતે સતિ ॥ ૮૦૫,,
ઘટં વિસ્ફુરયત્યેષઃ ચિદાભાસ સ્વતેજસા ।
ન તથા સ્વપ્રભે બ્રહ્મણ્યાભાસ ઉપયુજ્યતે ॥ ૮૦૬॥

અત એવ મતં વૃત્તિવ્યાપ્યત્વં વસ્તુનઃ સતામ્ ।
ન ફલવ્યાપ્યતા તેન ન વિરોધઃ પરસ્પરમ્ ॥ ૮૦૭॥

શ્રુત્યોદિતસ્તતો બ્રહ્મ જ્ઞેયં બુદ્ધ્યૈવ સૂક્ષ્મયા ।
પ્રજ્ઞામાન્દ્યં ભવેદ્યેષાં તેષાં ન શ્રુતિમાત્રતઃ ॥ ૮૦૮॥

સ્યાદખણ્ડાકારવૃત્તિર્વિના તુ મનનાદિના ।
શ્રવણાન્મનનાદ્ધ્યાનાત્તાત્પર્યેણ નિરન્તરમ્ ॥ ૮૦૯॥

બુદ્ધેઃ સૂક્ષ્મત્વમાયાતિ તતો વસ્તૂપલભ્યતે ।
મન્દપ્રજ્ઞાવતાં તસ્માત્કરણીયં પુનઃ પુનઃ ॥ ૮૧૦॥

શ્રવણં મનનં ધ્યાનં સમ્યગ્વસ્તૂપલબ્ધયે ।
સર્વવેદાન્તવાક્યાનાં ષડ્ભિર્લિઙ્ગૈઃ સદદ્વયે ॥ ૮૧૧॥

પરે બ્રહ્મણિ તાત્પર્યનિશ્ચયં શ્રવણં વિદુઃ ।
શ્રુતસ્યૈવાદ્વિતીયસ્ય વસ્તુનઃ પ્રત્યગાત્મનઃ ॥ ૮૧૨॥

વેદાન્તવાક્યાનુગુણયુક્તિભિસ્ત્વનુચિન્તનમ્ ।

મનનં તચ્છ્રુતાર્થસ્ય સાક્ષાત્કરણકારણમ્ ॥ ૮૧૩॥

વિજાતીયશરીરાદિપ્રત્યયત્યાગપૂર્વકમ્ ।
સજાતીયાત્મવૃત્તીનાં પ્રવાહકરણં યથા ॥ ૮૧૪॥

તૈલધારાવદચ્છિન્નવૃત્ત્યા તદ્ધ્યાનમિષ્યતે ।
તાવત્કાલં પ્રયત્નેન કર્તવ્યં શ્રવણં સદા ॥ ૮૧૫॥

પ્રમાણસંશયો યાવત્સ્વબુદ્ધેર્ન નિવર્તતે ।
પ્રમેયસંશયો યાવત્તાવત્તુ શ્રુતિયુક્તિભિઃ ॥ ૮૧૬॥

આત્મયાતાર્થ્યનિશ્ચિત્ત્યૈ કર્તવ્યં મનનં મુહુઃ ।
વિપરીતાત્મધીર્યાવન્ન વિનશ્યતિ ચેતસિ ।
તાવન્નિરન્તરં ધ્યાનં કર્તવ્યં મોક્ષમિચ્છતા ॥ ૮૧૭॥

યાવન્ન તર્કેણ નિરાસિતોઽપિ
દૃશ્યપ્રપઞ્ચસ્ત્વપરોક્ષબોધાત્ ।
વિલીયતે તાવદમુષ્ય ભિક્ષો-
ર્ધ્યાનાદિ સમ્યક્કરણીયમેવ ॥ ૮૧૮॥

## verses 819-826 Samadhi, absolute and relative

॥ ૪૦ ॥ સવિકલ્પઃ-નિર્વિકલ્પઃ સમાધિઃ ॥

સવિકલ્પો નિર્વિકલ્પ ઇતિ દ્વેધા નિગદ્યતે ।
સમાધિઃ સવિકલ્પસ્ય લક્ષણં વચ્મિ તચ્છૃણુ ॥ ૮૧૯॥

જ્ઞાત્રાદ્યવિલયેનૈવ જ્ઞેયે બ્રહ્મણિ કેવલે ।
તદાકારાકારિતયા ચિત્તવૃત્તેરવસ્થિતિઃ ॥ ૮૨૦॥

સદ્ભિઃ સ એવ વિજ્ઞેયઃ સમાધિઃ સવિકલ્પકઃ ।
મૃદ એવાવભાનેઽપિ મૃણ્મયદ્વિપભાનવત્ ॥ ૮૨૧॥

સન્માત્રવસ્તુભાનેઽપિ ત્રિપુટી ભાતિ સન્મયી ।
સમાધિરત એવાયં સવિકલ્પ ઇતીર્યતે ॥ ૮૨૨॥

જ્ઞાત્રાદિભાવમુત્સૃજ્ય જ્ઞેયમાત્રસ્થિતિર્દૃઢા ।
મનસો નિર્વિકલ્પઃ સ્યાત્સમાધિર્યોગસંજ્ઞિતઃ ॥ ૮૨૩॥

જલે નિક્ષિપ્તલવણં જલમાત્રતયા સ્થિતમ્ ।

પૃથઙ્ ન ભાતિ કિં ત્વમ્ભ એકમેવાવભાસતે ॥ ૮૨૪॥

યથા તથૈવ સા વૃત્તિર્બ્રહ્મમાત્રતયા સ્થિતા ।
પૃથઙ્ ન ભાતિ બ્રહ્મૈવાદ્વિતીયમવભાસતે ॥ ૮૨૫॥

જ્ઞાત્રાદિકલ્પનાભાવાન્મતોऽયં નિર્વિકલ્પકઃ ।
વૃત્તેઃ સદ્ભાવબાધાભ્યામુભયોર્ભેદ ઇષ્યતે ॥ ૮૨૬॥

## verses 827-865 The internal nature of samadhi

॥ ૪૧ ॥ સમાધિલક્ષણમ્ ॥

સમાધિસુપ્ત્યોર્ધ્યાનં ચાજ્ઞાનં સુપ્ત્યાં તુ નેષ્યતે ।
સવિકલ્પો નિર્વિકલ્પઃ સમાધી દ્વાવિમૌ હૃદિ ॥ ૮૨૭॥

મુમુક્ષોર્યત્નતઃ કાર્યૌ વિપરીતનિવૃત્તયે ।
કૃતેऽસ્મિન્વિપરીતાયા ભાવનાયા નિવર્તનમ્ ॥ ૮૨૮॥

જ્ઞાનસ્યાપ્રતિબદ્ધત્ત્વં સદાનન્દશ્ચ સિધ્યતિ ।
દૃશ્યાનુવિદ્ધઃ શબ્દાનુવિદ્ધશ્ચેતિ દ્વિધા મતઃ ॥ ૮૨૯॥

સવિકલ્પસ્તયોર્યત્તલ્લક્ષણં વચ્મિ તચ્છૃણુ ।
કામાદિપ્રત્યયૈર્દૃશ્યૈઃ સંસર્ગો યત્ર દૃશ્યતે ॥ ૮૩૦॥

સોऽયં દૃશ્યાનુવિદ્ધઃ સ્યાત્સમાધિઃ સવિકલ્પકઃ ।
અહમ્મમેદમિત્યાદિકામક્રોધાદિવૃત્તયઃ ॥ ૮૩૧॥

દૃશ્યન્તે યેન સંદ્રષ્ટ્રા દૃશ્યાઃ સ્યુરહમાદયઃ ।
કામાદિસર્વવૃત્તીનાં દ્રષ્ટારમવિકારિણમ્ ॥ ૮૩૨॥

સાક્ષિણં સ્વં વિજાનીયાદ્યસ્તાઃ પશ્યતિ નિષ્ક્રિયઃ ।
કામાદીનામહં સાક્ષી દૃશ્યન્તે તે મયા યતઃ ॥ ૮૩૩॥

ઇતિ સાક્ષિતયાત્માનં જાનાત્યાત્મનિ સાક્ષિણમ્ ।
દૃશ્યં કામાદિ સકલં સ્વાત્મન્યેવ વિલાપયેત્ ॥ ૮૩૪॥

નાહં દેહો નાપ્યસુર્નાક્ષવર્ગો
        નાહઙ્કારો નો મનો નાપિ બુદ્ધિઃ ।
અન્તસ્તેષાં ચાપિ તદ્વિક્રિયાણાં
        સાક્ષી નિત્યઃ પ્રત્યગેવાહમસ્મિ ॥ ૮૩૫॥

વાચઃ સાક્ષી પ્રાણવૃત્તેશ્ચ સાક્ષી
 બુદ્ધેઃ સાક્ષી બુદ્ધિવૃત્તેશ્ચ સાક્ષી ।
ચક્ષુઃશ્રોત્રાદીન્દ્રિયાણાં ચ સાક્ષી
 સાક્ષી નિત્યઃ પ્રત્યગેવાહમસ્મિ ॥ ૮૩૬॥

નાહં સ્થૂલો નાપિ સૂક્ષ્મો ન દીર્ઘો
 નાહં બાલો નો યુવા નાપિ વૃદ્ધઃ ।
નાહં કાણો નાપિ મૂકો ન ષણ્ડઃ
 સાક્ષી નિત્યઃ પ્રત્યગેવાહમસ્મિ ॥ ૮૩૭॥

નાસ્મ્યાગન્તા નાપિ ગન્તા ન હન્તા
 નાહં કર્તા ન પ્રયોક્તા ન વક્તા ।
નાહં ભોક્તા નો સુખી નૈવ દુઃખી
 સાક્ષી નિત્યઃ પ્રત્યગેવાહમસ્મિ ॥ ૮૩૮॥

નાહં યોગી નો વિયોગી ન રાગી
 નાહં ક્રોધી નૈવ કામી ન લોભી ।
નાહં બદ્ધો નાપિ યુક્તો ન મુક્તઃ
 સાક્ષી નિત્યઃ પ્રત્યગેવાહમસ્મિ ॥ ૮૩૯॥

નાન્તઃપ્રજ્ઞો નો બહિઃપ્રજ્ઞકો વા
 નૈવ પ્રજ્ઞો નાપિ ચાપ્રજ્ઞ એષઃ ।
નાહં શ્રોતા નાપિ મન્તા ન બોદ્ધા
 સાક્ષી નિત્યઃ પ્રત્યગેવાહમસ્મિ ॥ ૮૪૦॥

ન મેઽસ્તિ દેહેન્દ્રિયબુદ્ધિયોગો
 ન પુણ્યલેશોઽપિ ન પાપલેશઃ ।
ક્ષુધાપિપાસાદિષડૂર્મિદૂરઃ
 સદા વિમુક્તોઽસ્મિ ચિદેવ કેવલઃ ॥ ૮૪૧॥

અપાણિપાદોઽહમવાગચક્ષુ-
 રપ્રાણ એવાસ્મ્યમના હ્યબુદ્ધિઃ ।
વ્યોમેવ પૂર્ણોઽસ્મિ વિનિર્મલોઽસ્મિ
 સદૈકરૂપોઽસ્મિ ચિદેવ કેવલઃ ॥ ૮૪૨॥

ઇતિ સ્વમાત્માનમવેક્ષમાણઃ

પ્રતીતદૃશ્યં પ્રવિલાપયન્સદા ।
જહાતિ વિદ્વાન્વિપરીતભાવં
સ્વાભાવિકં ભ્રાન્તિવશાત્પ્રતીતમ્ ॥ ૮૪૩॥

વિપરીતાત્મતાસ્ફૂર્તિરેવ મુક્તિરિતીર્યતે ।
સદા સમાહિતસ્યૈવ સૈષા સિધ્યતિ નાન્યથા ॥ ૮૪૪॥

ન વેષભાષાભિરમુષ્ય મુક્તિ-
ર્યા કેવલાખણ્ડચિદાત્મના સ્થિતિઃ ।
તત્સિદ્ધયે સ્વાત્મનિ સર્વદા સ્થિતો
જહ્યાદહન્તાં મમતામુપાધૌ ॥ ૮૪૫॥

સ્વાત્મતત્ત્વં સમાલમ્બ્ય કુર્યાત્પ્રકૃતિનાશનમ્ ।
તેનૈવ મુક્તો ભવતિ નાન્યથા કર્મકોટિભિઃ ॥ ૮૪૬॥

જ્ઞાત્વા દેવં સર્વપાશાપહાનિઃ
ક્ષીણૈઃ ક્લેશૈર્જન્મમૃત્યુપ્રહાણિઃ ।
ઇત્યેવૈષા વૈદિકી વાગ્બ્રવીતિ
ક્લેશક્ષત્યાં જન્મમૃત્યુપ્રહાણિમ્ ॥ ૮૪૭॥

ભૂયો જન્માદ્યપ્રસક્તિર્વિમુક્તિઃ
ક્લેશક્ષત્યાં ભાતિ જન્માદ્યભાવઃ ।
ક્લેશક્ષત્યા હેતુરાત્મૈકનિષ્ઠા
તસ્માત્કાર્યા હ્યાત્મનિષ્ઠા મુમુક્ષોઃ ॥ ૮૪૮॥

ક્લેશાઃ સ્યુર્વાસના એવ જન્તોર્જન્માદિકારણમ્ ।
જ્ઞાનનિષ્ઠાગ્નિના દાહે તાસાં નો જન્મહેતુતા ॥ ૮૪૯॥

બીજાન્યગ્નિપ્રદગ્ધાનિ ન રોહન્તિ યથા પુનઃ ।
જ્ઞાનદગ્ધૈસ્તથા ક્લેશૈર્નાત્મા સમ્પદ્યતે પુનઃ ॥ ૮૫૦॥

તસ્માન્મુમુક્ષોઃ કર્તવ્યા જ્ઞાનનિષ્ઠા પ્રયત્નતઃ ।
નિઃશેષવાસનાક્ષત્યૈ વિપરીતનિવૃત્તયે ॥ ૮૫૧॥

જ્ઞાનનિષ્ઠાતત્પરસ્ય નૈવ કર્મોપયુજ્યતે ।
કર્મણો જ્ઞાનનિષ્ઠાયા ન સિધ્યતિ સહસ્થિતિઃ ॥ ૮૫૨॥ ન કદાપિ સહ સ્થિતિઃ

પરસ્પરવિરુદ્ધત્વાત્તયોર્ભિન્નસ્વભાવયોઃ ।
કર્તૃત્વભાવનાપૂર્વં કર્મ જ્ઞાનં વિલક્ષણમ્ ॥ ૮૫૩॥

દેહાત્મબુદ્ધેર્વિચ્છિત્ત્યૈ જ્ઞાનં કર્મ વિવૃદ્ધયે ।
અજ્ઞાનમૂલકં કર્મ જ્ઞાનં તૂભયનાશકમ્ ॥ ૮૫૪॥

જ્ઞાનેન કર્મણો યોગઃ કથં સિધ્યતિ વૈરિણા ।
સહયોગો ન ઘટતે યથા તિમિરતેજસોઃ ॥ ૮૫૫॥

નિમેષોન્મેષયોર્વાપિ તથૈવ જ્ઞાનકર્મણોઃ ।
પ્રતીચીં પશ્યતઃ પુંસઃ કુતઃ પ્રાચીવિલોકનમ્ । પુંસાં
પ્રત્યક્પ્રવણચિત્તસ્ય કુતઃ કર્મણિ યોગ્યતા ॥ ૮૫૬॥

જ્ઞાનૈકનિષ્ઠાનિરતસ્ય ભિક્ષો-
નૈવાવકાશોઽસ્તિ હિ કર્મતન્ત્રે ।
તદેવ કર્માસ્ય તદેવ સન્ધ્યા
તદેવ સર્વં ન તતોઽન્યદસ્તિ ॥ ૮૫૭॥

બુદ્ધિકલ્પિતમાલિન્યક્ષાલનં સ્નાનમાત્મનઃ ।
તેનૈવ શુદ્ધિરેતસ્ય ન મૃદા ન જલેન ચ ॥ ૮૫૮॥

સ્વસ્વરૂપે મનઃસ્થાનમનુષ્ઠાનં તદિષ્યતે ।
કરણત્રયસાધ્યં યત્તન્મૃષા તદસત્યતઃ ॥ ૮૫૯॥

વિનિષિધ્યાખિલં દૃશ્યં સ્વસ્વરૂપેણ યા સ્થિતિઃ ।
સા સન્ધ્યા તદનુષ્ઠાનં તદ્દાનં તદ્ધિ ભોજનમ્ ॥ ૮૬૦॥

વિજ્ઞાતપરમાર્થાનાં શુદ્ધસત્ત્વાત્મનાં સતામ્ ।
યતીનાં કિમનુષ્ઠાનં સ્વાનુસન્ધિં વિનાપરમ્ ॥ ૮૬૧॥

તસ્માત્ક્રિયાન્તરં ત્યક્ત્વા જ્ઞાનનિષ્ઠાપરો યતિઃ ।
સદાત્મનિષ્ઠયા તિષ્ઠેન્નિશ્ચલસ્તત્પરાયણઃ ॥ ૮૬૨॥

કર્તવ્યં સ્વોચિતં કર્મ યોગમારોઢુમિચ્છતા ।
આરોહણં કુર્વતસ્તુ કર્મ નારોહણં મતમ્ ॥ ૮૬૩॥

યોગં સમારોહતિ યો મુમુક્ષુઃ
ક્રિયાન્તરં તસ્ય ન યુક્તમીષત્ ।
ક્રિયાન્તરાસક્તમનાઃ પતત્યસૌ
તાલદ્રુમારોહણકર્તૃવદ્ધ્રુવમ્ ॥ ૮૬૪॥

યોગારૂઢસ્ય સિદ્ધસ્ય કૃતકૃત્યસ્ય ધીમતઃ ।
નાસ્ત્યેવ હિ બહિર્દૃષ્ટિઃ કા કથા તત્ર કર્મણામ્ ।
દૃશ્યાનુવિદ્ધઃ કથિતઃ સમાધિઃ સવિકલ્પકઃ ॥ ૮૬૫॥

## verses 866-898 Deep concentration blended with the sruti

॥ ૪૨ ॥ શ્રુત્યવગમ્યં તથ્યમ્ ॥

શુદ્ધોઽહં બુદ્ધોઽહં પ્રત્યગ્રૂપેણ નિત્યસિદ્ધોઽહમ્ ।
શાન્તોઽહમનન્તોઽહં સતતપરાનન્દસિન્ધુરેવાહમ્ ॥ ૮૬૬॥

આદ્યોઽહમનાદ્યોઽહં વાઙ્મનસાસાધ્યવસ્તુમાત્રોઽહમ્ ।
નિગમવચોવેદ્યોઽહમનવદ્યાખણ્ડબોધરૂપોઽહમ્ ॥ ૮૬૭॥

વિદિતાવિદિતાન્યોઽહં માયાતત્કાર્યલેશશૂન્યોઽહમ્ ।
કેવલદૃગાત્મકોઽહં સંવિન્માત્રઃ સકૃદ્વિભાતોઽહમ્ ॥ ૮૬૮॥

અપરોઽહમનપરોઽહં બહિરન્તશ્ચાપિ પૂર્ણ એવાહમ્ ।
અજરોઽહમક્ષરોઽહં નિત્યાનન્દોઽહમદ્વિતીયોઽહમ્ ॥ ૮૬૯॥

પ્રત્યગભિન્નમખણ્ડં સત્યજ્ઞાનાદિલક્ષણં શુદ્ધમ્ ।
શ્રુત્યવગમ્યં તથ્યં બ્રહ્મૈવાહં પરં જ્યોતિઃ ॥ ૮૭૦॥

એવં સન્માત્રગાહિન્યા વૃત્ત્યા તન્માત્રગાહકૈઃ ।
શબ્દૈઃ સમર્પિતં વસ્તુ ભાવયેન્નિશ્ચલો યતિઃ ॥ ૮૭૧॥

કામાદિદૃશ્યપ્રવિલાપપૂર્વકં
　　શુદ્ધોઽહમિત્યાદિકશબ્દમિશ્રઃ ।
દૃશ્યેવ નિષ્ઠસ્ય ય એષ ભાવઃ
　　શબ્દાનુવિદ્ધઃ કથિતઃ સમાધિઃ ॥ ૮૭૨॥

દૃશ્યસ્યાપિ ચ સાક્ષિત્વસમુલ્લેખસ્ય ચાત્મનિ । સાક્ષિત્વાત્સમુલ્લેખનમાત્મનિ
નિવર્તકમનોવસ્થા નિર્વિકલ્પ ઇતીર્યતે ॥ ૮૭૩॥

સવિકલ્પસમાધિં યો દીર્ઘકાલં નિરન્તરમ્ ।
સત્કારપૂર્વકં કુર્યાન્નિર્વિકલ્પોઽસ્ય સિધ્યતિ ॥ ૮૭૪॥

નિર્વિકલ્પકસમાધિનિષ્ઠયા
　　તિષ્ઠતો ભવતિ નિત્યતા ધ્રુવમ્ ।

ઉદ્ભવાદ્યપગતિર્નિરર્ગલા
નિત્યનિશ્ચલનિરન્તનિર્વૃતિઃ ॥ ૮૭૫॥

વિદ્વાનહમિદમિતિ વા કિઞ્ચિ-
દ્બાહ્યાભ્યન્તરવેદનશૂન્યઃ ।
સ્વાનન્દામૃતસિન્ધુનિમગ્ન-
સ્તૂષ્ણીમાસ્તે કશ્ચિદનન્યઃ ॥ ૮૭૬॥

નિર્વિકલ્પં પરં બ્રહ્મ યત્તસ્મિન્નેવ નિષ્ઠિતાઃ ।
એતે ધન્યા એવ મુક્તા જીવન્તોઽપિ બહિર્દૃશામ્ ॥ ૮૭૭॥

યથા સમાધિત્રિતયં યત્નેન ક્રિયતે હૃદિ ।
તથૈવ બાહ્યદેશેઽપિ કાર્યં દ્વૈતનિવૃત્તયે ॥ ૮૭૮॥

તત્પ્રકારં પ્રવક્ષ્યામિ નિશામય સમાસતઃ ।
અધિષ્ઠાનં પરં બ્રહ્મ સચ્ચિદાનન્દલક્ષણમ્ ॥ ૮૭૯॥

તત્રાધ્યસ્તમિદં ભાતિ નામરૂપાત્મકં જગત્ ।
સત્ત્વં ચિત્ત્વં તથાનન્દરૂપં યદ્બ્રહ્મણસ્ત્રયમ્ ॥ ૮૮૦॥

અધ્યસ્તજગતો રૂપં નામરૂપમિદં દ્વયમ્ ।
એતાનિ સચ્ચિન્દાનન્દનામરૂપાણિ પઞ્ચ ચ ॥ ૮૮૧॥

એકીકૃત્યોચ્યતે મૂર્ખૈરિદં વિશ્વમિતિ ભ્રમાત્ ।
શૈત્યં શ્વેતં રસં દ્રાવ્યં તરઙ્ગ ઇતિ નામ ચ ॥ ૮૮૨॥

એકીકૃત્ય તરઙ્ગોઽયમિતિ નિર્દિશ્યતે યથા ।
આરોપિતે નામરૂપે ઉપેક્ષ્ય બ્રહ્મણઃ સતઃ ॥ ૮૮૩॥

સ્વરૂપમાત્રગ્રહણં સમાધિર્બાહ્ય આદિમઃ ।
સચ્ચિદાનન્દરૂપસ્ય સકાશાદ્બ્રહ્મણો યતિઃ ॥ ૮૮૪॥

નામરૂપે પૃથક્કૃત્વા બ્રહ્મણ્યેવ વિલાપયન્ ।
અધિષ્ઠાનં પરં બ્રહ્મ સચ્ચિદાનન્દમદ્વયમ્ ।
યત્તદેવાહમિત્યેવ નિશ્ચિતાત્મા ભવેદ્ધ્રુવમ્ ॥ ૮૮૫॥

ઇયં ભૂર્ન સન્નાપિ તોયં ન તેજો
ન વાયુર્ન ખં નાપિ તત્કાર્યજાતમ્ ।
યદેષામધિષ્ઠાનભૂતં વિશુદ્ધં

સદેકં પરં સત્તદેવાહમસ્મિ ॥ ૮૮૬॥

ન શબ્દો ન રૂપં ન ચ સ્પર્શકો વા
તથા નો રસો નાપિ ગન્ધો ન ચાન્યઃ ।
યદેષામધિષ્ઠાનભૂતં વિશુદ્ધં
સદેકં પરં સત્તદેવાહમસ્મિ ॥ ૮૮૭॥

ન સદ્દ્રવ્યજાતં ગુણા ન ક્રિયા વા
ન જાતિર્વિશેષો ન ચાન્યઃ કદાપિ ।
યદેષામધિષ્ઠાનભૂતં વિશુદ્ધં
સદેકં પરં સત્તદેવાહમસ્મિ ॥ ૮૮૮॥

ન દેહો ન ચાક્ષાણિ ન પ્રાણવાયુ-
ર્મનો નાપિ બુદ્ધિર્ન ચિત્તં હ્યહંધીઃ ।
યદેષામધિષ્ઠાનભૂતં વિશુદ્ધં
સદેકં પરં સત્તદેવાહમસ્મિ ॥ ૮૮૯॥

ન દેશો ન કાલો ન દિગ્વાપિ સત્સ્યા-
ન્ન વસ્ત્વન્તરં સ્થૂલસૂક્ષ્માદિરૂપમ્ ।
યદેષામધિષ્ઠાનભૂતં વિશુદ્ધં
સદેકં પરં સત્તદેવાહમસ્મિ ॥ ૮૯૦॥

એતદ્દૃશ્યં નામરૂપાત્મકં યઃ
અધિષ્ઠાનં તદ્બ્રહ્મ સત્યં સદેતિ ।
ગચ્છંસ્તિષ્ઠન્વા શયાનોઽપિ નિત્યં
કુર્યાદ્વિદ્વાન્બાહ્યદૃશ્યાનુવિદ્ધમ્ ॥ ૮૯૧॥

અધ્યસ્તનામરૂપાદિપ્રવિલાપેન નિર્મલમ્ ।
અદ્વૈતં પરમાનન્દં બ્રહ્મૈવાસ્મીતિ ભાવયેત્ ॥ ૮૯૨॥

નિર્વિકારં નિરાકારં નિરઞ્જનમનામયમ્ ।
આદ્યન્તરહિતં પૂર્ણં બ્રહ્મૈવાહં ન સંશયઃ ॥ ૮૯૩॥

નિષ્કલઙ્કં નિરાતઙ્કં ત્રિવિધચ્છેદવર્જિતમ્ ।
આનન્દમક્ષરં મુક્તં બ્રહ્મૈવાસ્મીતિ ભાવયેત્ ॥ ૮૯૪॥

નિર્વિશેષં નિરાભાસં નિત્યમુક્તમવિક્રિયમ્ ।
પ્રજ્ઞાનૈકરસં સત્યં બ્રહ્મૈવાસ્મીતિ ભાવયેત્ ॥ ૮૯૫॥

શુદ્ધં બુદ્ધં તત્ત્વસિદ્ધં પરં પ્રત્યગખણ્ડિતમ્ ।
સ્વપ્રકાશં પરાકાશં બ્રહ્મૈવાસ્મીતિ ભાવયેત્ ॥ ૮૯૬॥

સુસૂક્ષ્મમસ્તિતામાત્રં નિર્વિકલ્પં મહત્તમમ્ ।
કેવલં પરમાદ્વૈતં બ્રહ્મૈવાસ્મીતિ ભાવયેત્ ॥ ૮૯૭॥

ઇત્યેવં નિર્વિકારાદિશબ્દમાત્રસમર્પિતમ્ ।
ધ્યાયતઃ કેવલં વસ્તુ લક્ષ્યે ચિત્તં પ્રતિષ્ઠતિ ॥ ૮૯૮॥

## verses 899-908 Nirvikalpa samadhi, absolute concentration

॥ ૪૩ ॥ સમાધિરકલ્પકઃ ॥

બ્રહ્માનન્દરસાવેશાદેકીભૂય તદાત્મના ।
વૃત્તેર્યા નિશ્ચલાવસ્થા સ સમાધિરકલ્પકઃ ॥ ૮૯૯॥

ઉત્થાને વાપ્યનુત્થાનેઽપ્યપ્રમત્તો જિતેન્દ્રિયઃ ।
સમાધિષટ્કં કુર્વીત સર્વદા પ્રયતો યતિઃ ॥ ૯૦૦॥

વિપરીતાર્થધીર્યાવન્ન નિઃશેષં નિવર્તતે ।
સ્વરૂપસ્ફુરણં યાવન્ન પ્રસિદ્ધ્યત્યનર્ગલમ્ ।
તાવત્સમાધિષટ્કેન નયેત્કાલં નિરન્તરમ્ ॥ ૯૦૧॥

ન પ્રમાદોઽત્ર કર્તવ્યો વિદુષા મોક્ષમિચ્છતા ।
પ્રમાદે જૃમ્ભતે માયા સૂર્યાપાયે તમો યથા ॥ ૯૦૨॥

સ્વાનુભૂતિં પરિત્યજ્ય ન તિષ્ઠન્તિ ક્ષણં બુધાઃ ।
સ્વાનુભૂતૌ પ્રમાદો યઃ સ મૃત્યુર્ન યમઃ સતામ્ ॥ ૯૦૩॥

અસ્મિન્સમાધૌ કુરુતે પ્રયાસં
    યસ્તસ્ય નૈવાસ્તિ પુનર્વિકલ્પઃ ।
સર્વાત્મભાવોઽપ્યમુનૈવ સિદ્ધ્યેત્
    સર્વાત્મભાવઃ ખલુ કેવલત્વમ્ ॥ ૯૦૪॥

સર્વાત્મભાવો વિદુષો બ્રહ્મવિદ્યાફલં વિદુઃ ।
જીવન્મુક્તસ્ય તસ્યૈવ સ્વાનન્દાનુભવઃ ફલમ્ ॥ ૯૦૫॥

યોઽહં મમેત્યાદ્યસદાત્મગાહકો
    ગ્રન્થિર્લયં યાતિ સ વાસનામયઃ ।

સમાધિના નશ્યતિ કર્મબન્ધો
બ્રહ્માત્મબોધોઽપ્રતિબન્ધ ઇષ્યતે ॥ ૯૦૬॥

એષ નિષ્કણ્ટકઃ પન્થા મુક્તેર્બ્રહ્માત્મના સ્થિતેઃ ।
શુદ્ધાત્મનાં મુમુક્ષૂણાં યત્સદેકત્વદર્શનમ્ ॥ ૯૦૭॥

તસ્માત્ત્વં ચાપ્યપ્રમત્તઃ સમાધી-
ન્કૃત્વા ગ્રન્થિં સાધુ નિર્દહ્ય યુક્તઃ ।
નિત્યં બ્રહ્માનન્દપીયૂષસિન્ધૌ
મજ્જન્ક્રીડન્મોદમાનો રમસ્વ ॥ ૯૦૮॥

## verses 909-921 Yoga, or union with Brahman

॥ ૪૪ ॥ યોગઃ ॥

નિર્વિકલ્પ સમાધિર્યો વૃત્તિનૈશ્ચલ્યલક્ષણઃ ।
તમેવ યોગ ઇત્યાહુર્યોગશાસ્ત્રાર્થકોવિદાઃ ॥ ૯૦૯॥

અષ્ટાવઙ્ગાનિ યોગસ્ય યમો નિયમ આસનમ્ ।
પ્રાણાયામસ્તથા પ્રત્યાહારશ્ચાપિ ચ ધારણા ॥ ૯૧૦॥

ધ્યાનં સમાધિરિત્યેવ નિગદન્તિ મનીષિણઃ ।
સર્વં બ્રહ્મેતિ વિજ્ઞાનાદિન્દ્રિયગ્રામસંયમઃ ॥ ૯૧૧॥

યમોઽયમિતિ સમ્પ્રોક્તોઽભ્યસનીયો મુહુર્મુહુઃ ।
સજાતીયપ્રવાહશ્ચ વિજાતીયતિરસ્કૃતિઃ ॥ ૯૧૨॥

નિયમો હિ પરાનન્દો નિયમાત્ક્રિયતે બુધૈઃ ।
સુખેનૈવ ભવેદ્યસ્મિન્નજસ્રં બ્રહ્મચિન્તનમ્ ॥ ૯૧૩॥

આસનં તદ્વિજાનીયાદિતરત્સુખનાશનમ્ ।
ચિત્તાદિસર્વભાવેષુ બ્રહ્મત્વેનૈવ ભાવનાત્ ॥ ૯૧૪॥

નિરોધઃ સર્વવૃત્તીનાં પ્રાણાયામઃ સ ઉચ્યતે ।
નિષેધનં પ્રપઞ્ચસ્ય રેચકાખ્યઃ સમીરણઃ ॥ ૯૧૫॥

બ્રહ્મૈવાસ્મીતિ યા વૃત્તિઃ પૂરકો વાયુરીરિતઃ ।
તતસ્તદ્વૃત્તિનૈશ્ચલ્યં કુમ્ભકઃ પ્રાણસંયમઃ ॥ ૯૧૬॥

અયં ચાપિ પ્રબુદ્ધાનામજ્ઞાનાં પ્રાણપીડનમ્ ।

વિષયેષ્વાત્મતાં ત્યક્ત્વા મનસશ્ચિતિ મજ્જનમ્ ॥ ૯૧૭॥

પ્રત્યાહારઃ સ વિજ્ઞેયોઽભ્યસનીયો મુમુક્ષુભિઃ ।
યત્ર યત્ર મનો યાતિ બ્રહ્મણસ્તત્ર દર્શનાત્ ॥ ૯૧૮॥

મનસો ધારણં ચૈવ ધારણા સા પરા મતા ।
બ્રહ્મૈવાસ્મીતિ સદ્વૃત્ત્યા નિરાલમ્બતયા સ્થિતિઃ ॥ ૯૧૯॥

ધ્યાનશબ્દેન વિખ્યાતા પરમાનન્દદાયિની ।
નિર્વિકારતયા વૃત્ત્યા બ્રહ્માકારતયા પુનઃ ॥ ૯૨૦॥

વૃત્તિવિસ્મરણં સમ્યક્સમાધિર્ધ્યાનસંજ્ઞકઃ ।
સમાધૌ ક્રિયમાણે તુ વિઘ્ના હ્યાયાન્તિ વૈ બલાત્ ॥ ૯૨૧॥

## verses 922-923 The obstacles to yoga

॥ ૪૫ ॥ યોગવિઘ્નાઃ ॥

અનુસંધાનરાહિત્યમાલસ્યં ભોગલાલસમ્ ।
ભયં તમશ્ચ વિક્ષેપસ્તેજસ્સ્પન્દશ્ચ શૂન્યતા ॥ ૯૨૨
એવં યદ્વિઘ્નબાહુલ્યં ત્યાજ્યં તદ્બ્રહ્મવિજ્જનૈઃ ।
વિઘ્નાનેતાન્પરિત્યક્ત્વા પ્રમાદરહિતો વશી ।
સમાધિનિષ્ઠયા બ્રહ્મ સાક્ષાદ્ભવિતુમર્હસિ ॥ ૯૨૩॥

## verses 924-937 Direct experience gained by right knowledge

॥ ૪૬ ॥ સ્વાનુભૂતિઃ ॥

ઇતિ ગુરુવચનાચ્છ્રુતિપ્રમાણા-
ત્પરમવગમ્ય સતત્ત્વમાત્મયુક્ત્યા ।
પ્રશમિતકરણઃ સમાહિતાત્મા
ક્વચિદચલાકૃતિરાત્મનિષ્ઠિતોઽભૂત્ ॥ ૯૨૪॥

બહુકાલં સમાધાય સ્વસ્વરૂપે તુ માનસમ્ ।
ઉત્થાય પરમાનન્દાદ્ગુરુમેત્ય પુનર્મુદા ॥ ૯૨૫॥

પ્રણામપૂર્વકં ધીમાન્સગદ્ગદમુવાચ હ ।
નમો નમસ્તે ગુરવે નિત્યાનન્દસ્વરૂપિણે ॥ ૯૨૬॥

મુક્તસઙ્ગાય શાન્તાય ત્યક્તાહન્તાય તે નમઃ ।
દયાધામ્ને નમો ભૂમ્ને મહિમ્નઃ પારમસ્ય તે ।
નૈવાસ્તિ યત્કટાક્ષેણ બ્રહ્મૈવાભવમદ્વયમ્ ॥ ૯૨૭॥

કિં કરોમિ ક્વ ગચ્છામિ કિં ગૃહ્ણામિ ત્યજામિ કિમ્ ।
યન્મયા પૂરિતં વિશ્વં મહાકલ્પામ્બુના યથા ॥ ૯૨૮॥

મયિ સુખબોધપયોધૌ મહતિ બ્રહ્માણ્ડબુદ્બુદસહસ્રમ્ ।
માયામયેન મરુતા ભૂત્વા ભૂત્વા પુનસ્તિરોધત્તે ॥ ૯૨૯॥

નિત્યાનન્દસ્વરૂપોઽહમાત્માહં ત્વદનુગ્રહાત્ ।
પૂર્ણોઽહમનવદ્યોઽહં કેવલોઽહં ચ સદ્ગુરો ॥ ૯૩૦॥

અકર્તાહમભોક્તાહમવિકારોઽહમક્રિયઃ ।
આનન્દઘન એવાહમસઙ્ગોઽહં સદાશિવઃ ॥ ૯૩૧॥

ત્વત્કટાક્ષવરચાન્દ્રચન્દ્રિકાપાતધૂતભવતાપજશ્રમઃ ।
પ્રાપ્તવાનહમખણ્ડવૈભવાનન્દમાત્મપદમક્ષયં ક્ષણાત્ ॥ ૯૩૨॥

છાયયા સ્પૃષ્ટમુષ્ણં વા શીતં વા દુષ્ટુ સુષ્ટુ વા ।
ન સ્પૃશત્યેવ યત્કિઞ્ચિત્પુરુષં તદ્વિલક્ષણમ્ ॥ ૯૩૩॥

ન સાક્ષિણં સાક્ષ્યધર્મા સંસ્પૃશન્તિ વિલક્ષણમ્ ।
અવિકારમુદાસીનં ગૃહધર્માઃ પ્રદીપવત્ ॥ ૯૩૪॥

રવેર્યથા કર્મણિ સાક્ષિભાવો
વહ્નેર્યથા વાયસિ દાહકત્વમ્ ।
રજ્જોર્યથારોપિતવસ્તુસઙ્ગ-
સ્તથૈવ કૂટસ્થચિદાત્મનો મે ॥ ૯૩૫॥

ઇત્યુક્ત્વા સ ગુરું સ્તુત્વા પ્રશ્રયેણ કૃતાનતિઃ ।
મુમુક્ષોરુપકારાય પ્રષ્ટવ્યાંશમપૃચ્છત ॥ ૯૩૬॥

જીવન્મુક્તસ્ય ભગવન્નનુભૂતેશ્ચ લક્ષણમ્ ।
વિદેહમુક્તસ્ય ચ મે કૃપયા બ્રૂહિ તત્ત્વતઃ ॥ ૯૩૭॥

# verses 938-948 The seven states of the mind

॥ ૪૭ ॥ સપ્તભૂમિકાઃ ॥

શ્રીગુરુઃ -
વક્ષ્યે તુભ્યં જ્ઞાનભૂમિકાયા લક્ષણમાદિતઃ ।
જ્ઞાતે યસ્મિંસ્ત્વયા સર્વં જ્ઞાતં સ્યાત્ પૃષ્ટમદ્ય યત્ ॥ ૯૩૮॥

જ્ઞાનભૂમિઃ શુભેચ્છા સ્યાત્પ્રથમા સમુદીરિતા ।
વિચારણા દ્વિતીયા તુ તૃતીયા તનુમાનસી ॥ ૯૩૯॥

સત્ત્વાપત્તિશ્ચતુર્થી સ્યાત્તતોઽસંસક્તિનામિકા ।
પદાર્થાભાવના ષષ્ઠી સપ્તમી તુર્યગા સ્મૃતા ॥ ૯૪૦॥

સ્થિતઃ કિં મૂઢ એવાસ્મિ પ્રેક્ષ્યેઽહં શાસ્ત્રસજ્જનૈઃ ।
વૈરાગ્યપૂર્વમિચ્છેતિ શુભેચ્છા ચોચ્યતે બુધૈઃ ॥ ૯૪૧॥

શાસ્ત્રસજ્જનસમ્પર્કવૈરાગ્યાભ્યાસપૂર્વકમ્ ।
સદાચારપ્રવૃત્તિર્યા પ્રોચ્યતે સા વિચારણા ॥ ૯૪૨॥

વિચારણાશુભેચ્છાભ્યામિન્દ્રિયાર્થેષુ રક્તતા ।
યત્ર સા તનુતામેતિ પ્રોચ્યતે તનુમાનસી ॥ ૯૪૩॥

ભૂમિકાત્રિતયાભ્યાસાચ્ચિત્તેઽર્થવિરતેર્વશાત્ ।
સત્ત્વાત્મનિ સ્થિતે શુદ્ધે સત્ત્વાપત્તિરુદાહૃતા ॥ ૯૪૪॥

દશાચતુષ્ટયાભ્યાસાદસંસર્ગફલા તુ યા ।
રૂઢસત્ત્વચમત્કારા પ્રોક્તા સંસક્તિનામિકા ॥ ૯૪૫॥

ભૂમિકાપઞ્ચકાભ્યાસાત્સ્વાત્મારામતયા ભૃશમ્ ।
આભ્યન્તરાણાં બાહ્યાનાં પદાર્થાનામભાવનાત્ ॥ ૯૪૬॥

પરપ્રયુક્તેન ચિરપ્રયત્નેનાવબોધનમ્ ।
પદાર્થાભાવના નામ ષષ્ઠી ભવતિ ભૂમિકા ॥ ૯૪૭॥

ષડ્ભૂમિકાચિરાભ્યાસાદ્ભેદસ્યાનુપલમ્ભનાત્ ।
યત્સ્વભાવૈકનિષ્ઠત્વં સા જ્ઞેયા તુર્યગા ક્ષિતિઃ ॥ ૯૪૮॥

# verses 949-978 The nature of knowledge

॥ ૪૮ ॥ જ્ઞાનલક્ષણમ્ ॥

ઇદં મમેતિ સર્વેષુ દૃશ્યભાવેષ્વભાવના ।
જાગ્રજ્જાગ્રદિતિ પ્રાહુર્મહાન્તો બ્રહ્મવિત્તમાઃ ॥ ૯૪૯॥

વિદિત્વા સચ્ચિદાનન્દમયીં દૃશ્યપરમ્પરામ્ ।
નામરૂપપરિત્યાગો જાગ્રત્સ્વપ્નઃ સમીર્યતે ॥ ૯૫૦॥

પરિપૂર્ણચિદાકાશે મયિ બોધાત્મતાં વિના ।
ન કિઞ્ચિદન્યદસ્તીતિ જાગ્રત્સુપ્તિઃ સમીર્યતે ॥ ૯૫૧॥

મૂલાજ્ઞાનવિનાશેન કારણાભાસચેષ્ટિતૈઃ ।
બન્ધો ન મેઽતિસ્વલ્પોઽપિ સ્વપ્નજાગ્રદિતીર્યતે ॥ ૯૫૨॥

કારણાજ્ઞાનનાશાદ્યદ્દ્રષ્ટૃદર્શનદૃશ્યતા ।
ન કાર્યમસ્તિ તજ્જ્ઞાનં સ્વપ્નસ્વપ્નઃ સમીર્યતે ॥ ૯૫૩॥

અતિસૂક્ષ્મવિમર્શેન સ્વધીવૃત્તિરચઞ્ચલા ।
વિલીયતે યદા બોધે સ્વપ્નસુપ્તિરિતીર્યતે ॥ ૯૫૪॥

ચિન્મયાકારમતિભિર્ધીવૃત્તિપ્રસરૈર્ગતઃ ।
આનન્દાનુભવો વિદ્વન્ સુપ્તિજાગ્રદિતીર્યતે ॥ ૯૫૫॥

વૃત્તૌ ચિરાનુભૂતાન્તરાનન્દાનુભવસ્થિતૌ ।
સમાત્મતાં યો યાત્યેષ સુપ્તિસ્વપ્ન ઇતીર્યતે ॥ ૯૫૬॥

દૃશ્યધીવૃત્તિરેતસ્ય કેવલીભાવભાવનાત્ ।
પરં બોધૈકતાવાપ્તિઃ સુપ્તિસુપ્તિરિતીર્યતે ॥ ૯૫૭॥

પરબ્રહ્મવદાભાતિ નિર્વિકારૈકરૂપિણી ।
સર્વાવસ્થાસુ ધારૈકા તુર્યાખ્યા પરિકીર્તિતા ॥ ૯૫૮॥

ઇત્યવસ્થાસમુલ્લાસં વિમૃશન્મુચ્યતે સુખી ।
શુભેચ્છાદિત્રયં ભૂમિભેદાભેદયુતં સ્મૃતમ્ ॥ ૯૫૯॥

યથાવદ્ભેદબુદ્ધ્યેદં જગજ્જાગ્રદિતીર્યતે ।
અદ્વૈતે સ્થૈર્યમાયાતે દ્વૈતે ચ પ્રશમં ગતે ॥ ૯૬૦॥

પશ્યન્તિ સ્વપ્નવલ્લોકં તુર્યભૂમિસુયોગતઃ ।

પઞ્ચમીં ભૂમિમારુહ્ય સુષુપ્તિપદનામિકામ્ ॥ ૯૬૧॥

શાન્તાશેષવિશેષાંશસ્તિષ્ઠેદદ્વૈતમાત્રકે ।
અન્તર્મુખતયા નિત્યં ષષ્ઠીં ભૂમિમુપાશ્રિતઃ ॥ ૯૬૨॥

પરિશ્રાન્તતયા ગાઢનિદ્રા લુરિવ લક્ષ્યતે ।
કુર્વન્નભ્યાસમેતસ્યાં ભૂમ્યાં સમ્યગ્વિવાસનઃ ॥ ૯૬૩॥

તુર્યાવસ્થાં સપ્તભૂમિં ક્રમાત્પ્રાપ્નોતિ યોગિરાટ્ ।
વિદેહમુક્તિરેવાત્ર તુર્યાતીતદશોચ્યતે ॥ ૯૬૪॥

યત્ર નાસન્ન સચ્ચાપિ નાહં નાપ્યનહઙ્કૃતિઃ ।
કેવલં ક્ષીણમનન આસ્તેઽદ્વૈતેઽતિનિર્ભયઃ ॥ ૯૬૫॥

અન્તઃશૂન્યો બહિઃશૂન્યઃ શૂન્યકુમ્ભ ઇવામ્બરે ।
અન્તઃપૂર્ણો બહિઃપૂર્ણઃ પૂર્ણકુમ્ભ ઇવાર્ણવે ॥ ૯૬૬॥

યથાસ્થિતમિદં સર્વં વ્યવહારવતોઽપિ ચ ।
અસ્તં ગતં સ્થિતં વ્યોમ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૬૭॥

નોદેતિ નાસ્તમાયાતિ સુખે દુઃખે મનઃ પ્રભા ।
યથાપ્રાપ્તસ્થિતિર્યસ્ય સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૬૮॥

યો જાગર્તિ સુષુપ્તિસ્થો યસ્ય જાગ્રન્ન વિદ્યતે ।
યસ્ય નિર્વાસનો બોધઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૬૯॥

રાગદ્વેષભયાદીનામનુરૂપં ચરન્નપિ ।
યોઽન્તર્વ્યોમવદત્યચ્છઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૦॥

યસ્ય નાહઙ્કૃતો ભાવો બુદ્ધિર્યસ્ય ન લિપ્યતે ।
કુર્વતોઽકુર્વતો વાપિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૧॥

યઃ સમસ્તાર્થજાલેષુ વ્યવહાર્યપિ શીતલઃ ।
પરાર્થેષ્વિવ પૂર્ણાત્મા સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૨॥

દ્વૈતવર્જિતચિન્માત્રે પદે પરમપાવને ।
અક્ષુબ્ધચિત્તવિશ્રાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૩॥

ઇદં જગદયં સોઽયં દૃશ્યજાતમવાસ્તવમ્ ।
યસ્ય ચિત્તે ન સ્ફુરતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૪॥

ચિદાત્માહં પરાત્માહં નિર્ગુણોઽહં પરાત્પરઃ ।
આત્મમાત્રેણ યસ્તિષ્ઠેત્સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૫॥

દેહત્રયાતિરિક્તોઽહં શુદ્ધચૈતન્યમસ્મ્યહમ્ ।
બ્રહ્માહમિતિ યસ્યાન્તઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૬॥

યસ્ય દેહાદિકં નાસ્તિ યસ્ય બ્રહ્મેતિ નિશ્ચયઃ ।
પરમાનન્દપૂર્ણો યઃ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૭॥

અહં બ્રહ્માસ્મ્યહં બ્રહ્માસ્મ્યહં બ્રહ્મેતિ નિશ્ચયઃ ।
ચિદહં ચિદહં ચેતિ સ જીવન્મુક્ત ઉચ્યતે ॥ ૯૭૮॥

## verses 978-1006 Videhamukti, incorporeal liberation

॥ ૪૯ ॥ વિદેહમુક્તિઃ ॥

જીવન્મુક્તિપદં ત્યક્ત્વા સ્વદેહે કાલસાત્કૃતે ।
વિશત્યદેહમુક્તત્વં પવનોઽસ્પન્દતામિવ ॥ ૯૭૯॥ મુક્તિત્વં
તતસ્તત્સમ્બભૂવાસૌ યદ્ગિરામપ્યગોચરમ્ ।
યચ્છૂન્યવાદિનાં શૂન્યં બ્રહ્મ બ્રહ્મવિદાં ચ યત્ ॥ ૯૮૦॥

વિજ્ઞાનં વિજ્ઞાનવિદાં મલાનાં ચ મલાત્મકમ્ ।
પુરુષઃ સાઙ્ખ્યદૃષ્ટીનામીશ્વરો યોગવાદિનામ્ ॥ ૯૮૧॥

શિવઃ શૈવાગમસ્થાનાં કાલઃ કાલૈકવાદિનામ્ ।
યત્સર્વશાસ્ત્રસિદ્ધાન્તં યત્સર્વહૃદયાનુગમ્ ।
યત્સર્વં સર્વગં વસ્તુ તત્તત્ત્વં તદસૌ સ્થિતઃ ॥ ૯૮૨॥

બ્રહ્મૈવાહં ચિદેવાહમેવં વાપિ ન ચિન્ત્યતે ।
ચિન્માત્રમેવ યસ્તિષ્ઠેદ્વિદેહો મુક્ત એવ સઃ ॥ ૯૮૩॥

યસ્ય પ્રપઞ્ચભાનં ન બ્રહ્માકારમપીહ ન ।
અતીતાતીતભાવો યો વિદેહો મુક્ત એવ સઃ ॥ ૯૮૪॥

ચિત્તવૃત્તેરતીતો યશ્ચિત્તવૃત્ત્યવભાસકઃ ।
ચિત્તવૃત્તિવિહીનો યો વિદેહો મુક્ત એવ સઃ ॥ ૯૮૫॥

જીવાત્મેતિ પરાત્મેતિ સર્વચિન્તાવિવર્જિતઃ ।
સર્વસઙ્કલ્પહીનાત્મા વિદેહો મુક્ત એવ સઃ ॥ ૯૮૬॥

ઓઙ્કારવાચ્યહીનાત્મા સર્વવાચ્યવિવર્જિતઃ ।
અવસ્થાત્રયહીનાત્મા વિદેહો મુક્ત એવ સઃ ॥ ૯૮૭॥

અહિર્નિર્લ્વયનીસર્પનિર્મોકો જીવવર્જિતઃ ।
વલ્મીકે પતિતસ્તિષ્ઠેત્તં સર્પો નાભિમન્યતે ॥ ૯૮૮॥

એવં સ્થૂલં ચ સૂક્ષ્મં ચ શરીરં નાભિમન્યતે ।
પ્રત્યગ્જ્ઞાનશિખિધ્વસ્તે મિથ્યાજ્ઞાને સહેતુકે ॥ ૯૮૯॥

નેતિ નેતીત્યરૂપત્વાદશરીરો ભવત્યયમ્ ।
વિશ્વશ્ચ તૈજસશ્ચૈવ પ્રાજ્ઞશ્ચેતિ ચ તે ત્રયઃ ॥ ૯૯૦॥

વિરાટ્ હિરણ્યગર્ભશ્ચેશ્વરશ્ચેતિ ચ તે ત્રયઃ । વિરાડ્  તે ત્રયમ્
બ્રહ્માણ્ડં ચૈવ પિણ્ડાણ્ડં લોકા ભૂરાદયઃ ક્રમાત્ ॥ ૯૯૧॥

સ્વસ્વોપાધિલયાદેવ લીયન્તે પ્રત્યગાત્મનિ ।
તૂષ્ણીમેવ તતસ્તૂષ્ણીં તૂષ્ણીં સત્યં ન કિઞ્ચન ॥ ૯૯૨॥

કાલભેદં વસ્તુભેદં દેશભેદં સ્વભેદકમ્ ।
કિઞ્ચિદ્ભેદં ન તસ્યાસ્તિ કિઞ્ચિદ્વાપિ ન વિદ્યતે ॥ ૯૯૩॥

જીવેશ્વરેતિ વાક્યે ચ વેદશાસ્ત્રેષ્વહં ત્વિતિ ।
ઇદં ચૈતન્યમેવેત્યહં ચૈતન્યમિત્યપિ ॥ ૯૯૪॥

ઇતિ નિશ્ચયશૂન્યો યો વિદેહો મુક્ત એવ સઃ ।
બ્રહ્મૈવ વિદ્યતે સાક્ષાદ્વસ્તુતોઽવસ્તુતોઽપિ ચ ॥ ૯૯૫॥

તદ્વિદ્યાવિષયં બ્રહ્મ સત્યજ્ઞાનસુખાત્મકમ્ ।
શાન્તં ચ તદતીતં ચ પરં બ્રહ્મ તદુચ્યતે ॥ ૯૯૬॥

સિદ્ધાન્તોઽધ્યાત્મશાસ્ત્રાણાં સર્વાપહ્નવ એવ હિ ।
નાવિદ્યાસ્તીહ નો માયા શાન્તં બ્રહ્મૈવ તદ્વિના ॥ ૯૯૭॥

પ્રિયેષુ સ્વેષુ સુકૃતમપ્રિયેષુ ચ દુષ્કૃતમ્ ।
વિસૃજ્ય ધ્યાનયોગેન બ્રહ્માપ્યેતિ સનાતનમ્ ॥ ૯૯૮॥

યાવદ્યાવચ્ચ સદ્બુદ્ધે સ્વયં સન્ત્યજ્યતેઽખિલમ્ ।
તાવત્તાવત્પરાનન્દઃ પરમાત્મૈવ શિષ્યતે ॥ ૯૯૯॥

યત્ર યત્ર મૃતો જ્ઞાની પરમાક્ષરવિત્સદા ।
પરે બ્રહ્મણિ લીયેત ન તસ્યોત્ક્રાન્તિરિષ્યતે ॥ ૧૦૦૦॥

યદ્યત્સ્વાભિમતં વસ્તુ તત્ત્યજન્મોક્ષમશ્નુતે ।
અસઙ્કલ્પેન શસ્ત્રેણ છિન્નં ચિત્તમિદં યદા ॥ ૧૦૦૧॥

સર્વં સર્વગતં શાન્તં બ્રહ્મ સમ્પદ્યતે તદા ।
ઇતિ શ્રુત્વા ગુરોર્વાક્યં શિષ્યસ્તુ છિન્નસંશયઃ ॥ ૧૦૦૨॥

જ્ઞાતજ્ઞેયઃ સમ્પ્રણમ્ય સદ્ગુરોશ્ચરણામ્બુજમ્ ।
સ તેન સમનુજ્ઞાતો યયૌ નિર્મુક્તબન્ધનઃ ॥ ૧૦૦૩॥

ગુરુરેષ સદાનન્દસિન્ધૌ નિર્મગ્નમાનસઃ ।
પાવયન્વસુધાં સર્વાં વિચચાર નિરુત્તરઃ ॥ ૧૦૦૪॥

ઇત્યાચાર્યસ્ય શિષ્યસ્ય સંવાદેનાત્મલક્ષણમ્ ।
નિરૂપિતં મુમુક્ષૂણાં સુખબોધોપપત્તયે ॥ ૧૦૦૫॥

સર્વવેદાન્તસિદ્ધાન્તસારસઙ્ગ્રહનામકઃ ।
ગ્રન્થોઽયં હૃદયગ્રન્થિવિચ્છિત્ત્યૈ રચિતઃ સતામ્ ॥ ૧૦૦૬॥

ઇતિ
શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
સર્વવેદાન્તસિદ્ધાન્તસારસઙ્ગ્રહઃ
સમ્પૂર્ણઃ ॥

॥ ઇતિ ॥

Encoded by Sunder Hattangadi sunderh at hotmail.com
Proofread by Sunder Hattangadi, Kalyana Krrit kalyanakrrit at gmail.com

*sarvavedAntasiddhAntasArasangrahaH*

pdf was typeset on September 1, 2019

Please send corrections to *sanskrit@cheerful.com*